# Rigveda Mandala 7

# ઋગ્વેદઃ મણ્ડલં ૭

## Document Information

Text title : Rigveda Mandalam 7

File name : r07.itx

Category : veda, rigveda, svara

Location : doc_veda

Author : Vedic Tradition

Transliterated by : 1. Source: Aufrecht/van Nooten/Holland (Samhita), 2. Final transliteration: Detlef Eichler

Proofread by : Detlef Eichler detlefeichler at googlemail.com

Latest update : July 2, 2013

Send corrections to : detlefeichler@googlemail.com, sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 2, 2020

*sanskritdocuments.org*

# Rigveda Mandala 7

## ઋગ્વેદઃ મણ્ડલં ૭

અગ્નિં નરો દીધિતિભિરરણ્યોર્હસ્તચ્યુતી જનયન્ત પ્રશસ્તમ્ ।
દૂરેદૃશં ગૃહપતિમથર્યુમ્ ॥ ૭.૦૦૧.૦૧

તમગ્નિમસ્તે વસવો ન્યૃણ્વન્સુપ્રતિચક્ષમવસે કુતશ્ચિત્ ।
દક્ષાય્યો યો દમ આસ નિત્યઃ ॥ ૭.૦૦૧.૦૨

પ્રેદ્ધો અગ્ને દીદિહિ પુરો નોઽજસ્રયા સૂર્મ્યા યવિષ્ઠ ।
ત્વાં શશ્વન્ત ઉપ યન્તિ વાજાઃ ॥ ૭.૦૦૧.૦૩

પ્ર તે અગ્નયોઽગ્નિભ્યો વરં નિઃ સુવીરાસઃ શોશુચન્ત દ્યુમન્તઃ ।
યત્રા નરઃ સમાસતે સુજાતાઃ ॥ ૭.૦૦૧.૦૪

દા નો અગ્ને ધિયા રયિં સુવીરં સ્વપત્યં સહસ્ય પ્રશસ્તમ્ ।
ન યં યાવા તરતિ યાતુમાવાન્ ॥ ૭.૦૦૧.૦૫

ઉપ યમેતિ યુવતિઃ સુદક્ષં દોષા વસ્તોર્હવિષ્મતી ઘૃતાચી ।
ઉપ સ્વૈનમરમતિર્વસૂયુઃ ॥ ૭.૦૦૧.૦૬

વિશ્વા અગ્નેઽપ દહારાતીર્યેભિસ્તપોભિરદહો જરૂથમ્ ।
પ્ર નિસ્વરં ચાતયસ્વામીવામ્ ॥ ૭.૦૦૧.૦૭

આ યસ્તે અગ્ન ઇધતે અનીકં વસિષ્ઠ શુક્ર દીદિવઃ પાવક ।
ઉતો ન એભિઃ સ્તવથૈરિહ સ્યાઃ ॥ ૭.૦૦૧.૦૮

વિ યે તે અગ્ને ભેજિરે અનીકં મર્તા નરઃ પિત્ર્યાસઃ પુરુત્રા ।
ઉતો ન એભિઃ સુમના ઇહ સ્યાઃ ॥ ૭.૦૦૧.૦૯

ઇમે નરો વૃત્રહત્યેષુ શૂરા વિશ્વા અદેવીરભિ સન્તુ માયાઃ ।
યે મે ધિયં પનયન્ત પ્રશસ્તામ્ ॥ ૭.૦૦૧.૧૦

મા શૂને અગ્ને નિ ષદામ નૃણાં માશેષસોઽવીરતા પરિ ત્વા ।
પ્રજાવતીષુ દુર્યાસુ દુર્ય ॥ ૭.૦૦૧.૧૧

યમશ્વી નિત્યમુપયાતિ યજ્ઞં પ્રજાવન્તં સ્વપત્યં ક્ષયં નઃ ।

સ્વજન્મના શેષસા વાવૃધાનમ્ ॥ ૭.૦૦૧.૧૨

પાહિ નો અગ્ને રક્ષસો અજુષ્ટાત્પાહિ ધૂર્તેરરરુષો અઘાયોઃ ।

ત્વા યુજા પૃતનાયૂઁરભિ ષ્યામ્ ॥ ૭.૦૦૧.૧૩

સેદગ્નિરગ્નીઁરત્યસ્ત્વન્યાન્યત્ર વાજી તનયો વીળુપાણિઃ ।

સહસ્રપાથા અક્ષરા સમેતિ ॥ ૭.૦૦૧.૧૪

સેદગ્નિર્યો વનુષ્યતો નિપાતિ સમેદ્ધારમંહસ ઉરુષ્યાત્ ।

સુજાતાસઃ પરિ ચરન્તિ વીરાઃ ॥ ૭.૦૦૧.૧૫

અયં સો અગ્નિરાહુતઃ પુરુત્રા યમીશાનઃ સમિદિન્ધે હવિષ્માન્ ।

પરિ યમેત્યધ્વરેષુ હોતા ॥ ૭.૦૦૧.૧૬

ત્વે અગ્ન આહવનાનિ ભૂરીશાનાસ આ જુહુયામ નિત્યા ।

ઉભા કૃણ્વન્તો વહતૂ મિયેધે ॥ ૭.૦૦૧.૧૭

ઇમો અગ્ને વીતતમાનિ હવ્યાજસ્રો વક્ષિ દેવતાતિમચ્છ ।

પ્રતિ ન ઈં સુરભીણિ વ્યન્તુ ॥ ૭.૦૦૧.૧૮

મા નો અગ્નેઽવીરતે પરા દા દુર્વાસસેઽમતયે મા નો અસ્યૈ ।

મા નઃ ક્ષુધે મા રક્ષસ ઋતાવો મા નો દમે મા વન આ જુહૂર્થાઃ ॥ ૭.૦૦૧.૧૯

નૂ મે બ્રહ્માણ્યગ્ન ઉચ્છશાધિ ત્વં દેવ મઘવદ્ભ્યઃ સુષૂદઃ ।

રાતૌ સ્યામોભયાસ આ તે યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૦૧.૨૦

ત્વમગ્ને સુહવો રણ્વસંદૃક્સુદીતી સૂનો સહસો દિદીહિ ।

મા ત્વે સચા તનયે નિત્ય આ ધઙ્મા વીરો અસ્મન્નર્યો વિ દાસીત્ ॥ ૭.૦૦૧.૨૧

મા નો અગ્ને દુર્ભૃતયે સચૈષુ દેવેદ્ધેષ્વગ્નિષુ પ્ર વોચઃ ।

મા તે અસ્માન્દુર્મતયો ભૃમાચ્ચિદ્દેવસ્ય સૂનો સહસો નશન્ત ॥ ૭.૦૦૧.૨૨

સ મર્તો અગ્ને સ્વનીક રેવાનમર્ત્યે ય આજુહોતિ હવ્યમ્ ।

સ દેવતા વસુવનિં દધાતિ યં સૂરિરર્થી પૃચ્છમાન એતિ ॥ ૭.૦૦૧.૨૩

મહો નો અગ્ને સુવિતસ્ય વિદ્વાન્રયિં સૂરિભ્ય આ વહા બૃહન્તમ્ ।

યેન વયં સહસાવન્મદેમાવિક્ષિતાસ આયુષા સુવીરાઃ ॥ ૭.૦૦૧.૨૪

નૂ મે બ્રહ્માણ્યગ્ન ઉચ્છશાધિ ત્વં દેવ મઘવદ્ભ્યઃ સુષૂદઃ ।

રાતૌ સ્યામોભયાસ આ તે યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૦૧.૨૫

જુષસ્વ નઃ સમિધમગ્ને અદ્ય શોચા બૃહદ્યજતં ધૂમમૃણ્વન્ ।
ઉપ સ્પૃશ દિવ્યં સાનુ સ્તૂપૈઃ સં રશ્મિભિસ્તતનઃ સૂર્યસ્ય ॥ ૭.૦૦૨.૦૧
નરાશંસસ્ય મહિમાનમેષામુપ સ્તોષામ યજતસ્ય યજ્ઞૈઃ ।
યે સુક્રતવઃ શુચયો ધિયંધાઃ સ્વદન્તિ દેવા ઉભયાનિ હવ્યા ॥ ૭.૦૦૨.૦૨
ઈળેન્યં વો અસુરં સુદક્ષમન્તર્દૂતં રોદસી સત્યવાચમ્ ।
મનુષ્વદગ્નિં મનુના સમિદ્ધં સમધ્વરાય સદમિન્મહેમ ॥ ૭.૦૦૨.૦૩
સપર્યવો ભરમાણા અભિજ્ઞુ પ્ર વૃઞ્જતે નમસા બર્હિરગ્નૌ ।
આજુહ્વાના ઘૃતપૃષ્ઠં પૃષદ્વદધ્વર્યવો હવિષા મર્જયધ્વમ્ ॥ ૭.૦૦૨.૦૪
સ્વાધ્યો૩ વિ દુરો દેવયન્તોઽશિશ્રયૂ રથયુર્દેવતાતા ।
પૂર્વી શિશું ન માતરા રિહાણે સમગ્રુવો ન સમનેષ્વઞ્જન્ ॥ ૭.૦૦૨.૦૫
ઉત યોષણે દિવ્યે મહી ન ઉષાસાનક્તા સુદુઘેવ ધેનુઃ ।
બર્હિષદા પુરુહૂતે મઘોની આ યજ્ઞિયે સુવિતાય શ્રયેતામ્ ॥ ૭.૦૦૨.૦૬
વિપ્રા યજ્ઞેષુ માનુષેષુ કારૂ મન્યે વાં જાતવેદસા યજધ્યૈ ।
ઊર્ધ્વં નો અધ્વરં કૃતં હવેષુ તા દેવેષુ વનથો વાર્યાણિ ॥ ૭.૦૦૨.૦૭
આ ભારતી ભારતીભિઃ સજોષા ઇળા દેવૈર્મનુષ્યેભિરગ્નિઃ ।
સરસ્વતી સારસ્વતેભિરર્વાક્તિસ્રો દેવીર્બર્હિરેદં સદન્તુ ॥ ૭.૦૦૨.૦૮
તન્નસ્તુરીપમધ પોષયિત્નુ દેવ ત્વષ્ટર્વિ રરાણઃ સ્યસ્વ ।
યતો વીરઃ કર્મણ્યઃ સુદક્ષો યુક્તગ્રાવા જાયતે દેવકામઃ ॥ ૭.૦૦૨.૦૯
વનસ્પતેઽવ સૃજોપ દેવાનગ્નિર્હવિઃ શમિતા સૂદયાતિ ।
સેદુ હોતા સત્યતરો યજાતિ યથા દેવાનાં જનિમાનિ વેદ ॥ ૭.૦૦૨.૧૦
આ યાહ્યગ્ને સમિધાનો અર્વાઙિન્દ્રેણ દેવૈઃ સરથં તુરેભિઃ ।
બર્હિર્ન આસ્તામદિતિઃ સુપુત્રા સ્વાહા દેવા અમૃતા માદયન્તામ્ ॥ ૭.૦૦૨.૧૧

અગ્નિં વો દેવમગ્નિભિઃ સજોષા યજિષ્ઠં દૂતમધ્વરે કૃણુધ્વમ્ ।
યો મર્ત્યેષુ નિધ્રુવિરૃતાવા તપુર્મૂર્ધા ઘૃતાન્નઃ પાવકઃ ॥ ૭.૦૦૩.૦૧
પ્રોથદશ્વો ન યવસેઽવિષ્યન્યદા મહઃ સંવરણાદ્વ્યસ્થાત્ ।
આદસ્ય વાતો અનુ વાતિ શોચિરધ સ્મ તે વ્રજનં કૃષ્ણમસ્તિ ॥ ૭.૦૦૩.૦૨

ઉધસ્ય તે નવજાતસ્ય વૃષ્ણોऽગ્ને ચરન્ત્યજરા ઇધાનાઃ ।
અચ્છા ધામરુષો ધૂમ એતિ સં દૂતો અગ્ન ઈયસે હિ દેવાન્ ॥ ૭.૦૦૩.૦૩
વિ યસ્ય તે પૃથિવ્યાં પાજો અશ્રેત્તૃષુ યદન્ના સમવૃક્ત જમ્ભૈઃ ।
સેનેવ સૃષ્ટા પ્રસિતિષ્ટ એતિ યવં ન દસ્મ જુહ્વા વિવેક્ષિ ॥ ૭.૦૦૩.૦૪
તમિદ્દોષા તમુષસિ યવિષ્ઠમગ્નિમત્યં ન મર્જયન્ત નરઃ ।
નિશિશાના અતિથિમસ્ય યોનૌ દીદાય શોચિરાહુતસ્ય વૃષ્ણઃ ॥ ૭.૦૦૩.૦૫
સુસંદૃક્તે સ્વનીક પ્રતીકં વિ યદ્રુક્મો ન રોચસ ઉપાકે ।
દિવો ન તે તન્યતુરેતિ શુષ્મશ્ચિત્રો ન સૂરઃ પ્રતિ ચક્ષિ ભાનુમ્ ॥ ૭.૦૦૩.૦૬
યથા વઃ સ્વાહાગ્નયે દાશેમ પરીળાભિર્ઘૃતવદ્ભિશ્ચ હવ્યૈઃ ।
તેભિર્નો અગ્ને અમિતૈર્મહોભિઃ શતં પૂર્ભિરાયસીભિર્નિ પાહિ ॥ ૭.૦૦૩.૦૭
યા વા તે સન્તિ દાશુષે અધૃષ્ટા ગિરો વા યાભિર્નૃવતીરુરુષ્યાઃ ।
તાભિર્નઃ સૂનો સહસો નિ પાહિ સ્મત્સૂરીઞ્જરિતૄઞ્જાતવેદઃ ॥ ૭.૦૦૩.૦૮
નિર્યત્પૂતેવ સ્વધિતિઃ શુચિર્ગાત્સ્વયા કૃપા તન્વા રોચમાનઃ ।
આ યો માત્રોરુશેન્યો જનિષ્ટ દેવયજ્યાય સુક્રતુઃ પાવકઃ ॥ ૭.૦૦૩.૦૯
એતા નો અગ્ને સૌભગા દિદીહ્યપિ ક્રતું સુચેતસં વતેમ ।
વિશ્વા સ્તોતૃભ્યો ગૃણતે ચ સન્તુ યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૦૩.૧૦

પ્ર વઃ શુક્રાય ભાનવે ભરધ્વં હવ્યં મતિં ચાગ્નયે સુપૂતમ્ ।
યો દૈવ્યાનિ માનુષા જનૂંષ્યન્તર્વિશ્વાનિ વિદ્મના જિગાતિ ॥ ૭.૦૦૪.૦૧
સ ગૃત્સો અગ્નિસ્તરુણશ્ચિદસ્તુ યતો યવિષ્ઠો અજનિષ્ટ માતુઃ ।
સં યો વના યુવતે શુચિદન્ભૂરિ ચિદન્ના સમિદત્તિ સદ્યઃ ॥ ૭.૦૦૪.૦૨
અસ્ય દેવસ્ય સંસદ્યનીકે યં મર્તાસઃ શ્યેતં જગૃભ્રે ।
નિ યો ગૃભં પૌરુષેયીમુવોચ દુરોકમગ્નિરાયવે શુશોચ ॥ ૭.૦૦૪.૦૩
અયં કવિરકવિષુ પ્રચેતા મર્તેષ્વગ્નિરમૃતો નિ ધાયિ ।
સ મા નો અત્ર જુહુરઃ સહસ્વઃ સદા ત્વે સુમનસઃ સ્યામ ॥ ૭.૦૦૪.૦૪
આ યો યોનિં દેવકૃતં સસાદ ક્રત્વા હ્યગ્નિરમૃતાઁ અતારીત્ ।
તમોષધીશ્ચ વનિનશ્ચ ગર્ભં ભૂમિશ્ચ વિશ્વધાયસં બિભર્તિ ॥ ૭.૦૦૪.૦૫
ઈશે હ્યગ્નિરમૃતસ્ય ભૂરેરીશે રાયઃ સુવીર્યસ્ય દાતોઃ ।

મા ત્વા વયં સહસાવન્નવીરા માપ્સવઃ પરિ ષદામ માદુવઃ ॥ ૭.૦૦૪.૦૬
પરિષદ્યં હ્યરણસ્ય રેક્ણો નિત્યસ્ય રાયઃ પતયઃ સ્યામ ।
ન શેષો અગ્ને અન્યજાતમસ્ત્યચેતાનસ્ય મા પથો વિ દુક્ષઃ ॥ ૭.૦૦૪.૦૭
નહિ ગ્રભાયારણઃ સુશેવોઽન્યોદર્યો મનસા મન્તવા ઉ ।
અધા ચિદોકઃ પુનરિત્સ એત્યા નો વાજ્યભીષાળેતુ નવ્યઃ ॥ ૭.૦૦૪.૦૮
ત્વમગ્ને વનુષ્યતો નિ પાહિ ત્વમુ નઃ સહસાવન્નવદ્યાત્ ।
સં ત્વા ધ્વસ્મન્વદભ્યેતુ પાથઃ સં રયિઃ સ્પૃહયાય્યઃ સહસ્રી ॥ ૭.૦૦૪.૦૯
એતા નો અગ્ને સૌભગા દિદીહ્યપિ ક્રતું સુચેતસં વતેમ ।
વિશ્વા સ્તોતૃભ્યો ગૃણતે ચ સન્તુ યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૦૪.૧૦

પ્રાગ્નયે તવસે ભરધ્વં ગિરં દિવો અરતયે પૃથિવ્યાઃ ।
યો વિશ્વેષામમૃતાનામુપસ્થે વૈશ્વાનરો વાવૃધે જાગૃવદ્ભિઃ ॥ ૭.૦૦૫.૦૧
પૃષ્ટો દિવિ ધાય્યગ્નિઃ પૃથિવ્યાં નેતા સિન્ધૂનાં વૃષભઃ સ્તિયાનામ્ ।
સ માનુષીરભિ વિશો વિ ભાતિ વૈશ્વાનરો વાવૃધાનો વરેણ ॥ ૭.૦૦૫.૦૨
ત્વદ્ભિયા વિશ આયન્નસિક્નીરસમના જહતીર્ભોજનાનિ ।
વૈશ્વાનર પૂરવે શોશુચાનઃ પુરો યદગ્ને દરયન્નદીદેઃ ॥ ૭.૦૦૫.૦૩
તવ ત્રિધાતુ પૃથિવી ઉત દ્યૌર્વૈશ્વાનર વ્રતમગ્ને સચન્ત ।
ત્વં ભાસા રોદસી આ તતન્થાજસ્રેણ શોચિષા શોશુચાનઃ ॥ ૭.૦૦૫.૦૪
ત્વામગ્ને હરિતો વાવશાના ગિરઃ સચન્તે ધુનયો ઘૃતાચીઃ ।
પતિં કૃષ્ટીનાં રથ્યં રયીણાં વૈશ્વાનરમુષસાં કેતુમહ્નામ્ ॥ ૭.૦૦૫.૦૫
ત્વે અસુર્યં૧ વસવો ન્યૃણ્વન્ક્રતું હિ તે મિત્રમહો જુષન્ત ।
ત્વં દસ્યૂઁરોકસો અગ્ન આજ ઉરુ જ્યોતિર્જનયન્નાર્યાય ॥ ૭.૦૦૫.૦૬
સ જાયમાનઃ પરમે વ્યોમન્વાયુર્ન પાથઃ પરિ પાસિ સદ્યઃ ।
ત્વં ભુવના જનયન્નભિ ક્રન્નપત્યાય જાતવેદો દશસ્યન્ ॥ ૭.૦૦૫.૦૭
તામગ્ને અસ્મે ઇષમેરયસ્વ વૈશ્વાનર દ્યુમતીં જાતવેદઃ ।
યયા રાધઃ પિન્વસિ વિશ્વવાર પૃથુ શ્રવો દાશુષે મર્ત્યાય ॥ ૭.૦૦૫.૦૮
તં નો અગ્ને મઘવદ્ભ્યઃ પુરુક્ષું રયિં નિ વાજં શ્રુત્યં યુવસ્વ ।
વૈશ્વાનર મહિ નઃ શર્મ યચ્છ રુદ્રેભિરગ્ને વસુભિઃ સજોષાઃ ॥ ૭.૦૦૫.૦૯

પ્ર સમ્રાજો અસુરસ્ય પ્રશસ્તિં પુંસઃ કૃષ્ટીનામનુમાદ્યસ્ય ।
ઇન્દ્રસ્યેવ પ્ર તવસસ્કૃતાનિ વન્દે દારું વન્દમાનો વિવક્મિ ॥ ૭.૦૦૬.૦૧
કવિં કેતું ધાસિં ભાનુમદ્રેર્હિન્વન્તિ શં રાજ્યં રોદસ્યોઃ ।
પુરંદરસ્ય ગીર્ભિરા વિવાસેઽગ્નેર્વ્રતાનિ પૂર્વ્યા મહાનિ ॥ ૭.૦૦૬.૦૨
ન્યક્રતૂન્ગ્રથિનો મૃધ્રવાચઃ પણીઁરશ્રદ્ધાઁ અવૃધાઁ અયજ્ઞાન્ ।
પ્રપ્ર તાન્દસ્યૂઁરગ્નિર્વિવાય પૂર્વશ્ચકારાપરાઁ અયજ્યૂન્ ॥ ૭.૦૦૬.૦૩
યો અપાચીને તમસિ મદન્તીઃ પ્રાચીશ્ચકાર નૃતમઃ શચીભિઃ ।
તમીશાનં વસ્વો અગ્નિં ગૃણીષેઽનાનતં દમયન્તં પૃતન્યૂન્ ॥ ૭.૦૦૬.૦૪
યો દેહ્યોઽઉ અનમયદ્વધસ્નૈર્યો અર્યપત્નીરુષસશ્ચકાર ।
સ નિરુધ્યા નહુષો યહ્વો અગ્નિર્વિશશ્ચક્રે બલિહૃતઃ સહોભિઃ ॥ ૭.૦૦૬.૦૫
યસ્ય શર્મન્નુપ વિશ્વે જનાસ એવૈસ્તસ્થુઃ સુમતિં ભિક્ષમાણાઃ ।
વૈશ્વાનરો વરમા રોદસ્યોરાગ્નિઃ સસાદ પિત્રોરુપસ્થમ્ ॥ ૭.૦૦૬.૦૬
આ દેવો દદે બુધ્ન્યાઉ વસૂનિ વૈશ્વાનર ઉદિતા સૂર્યસ્ય ।
આ સમુદ્રાદવરાદા પરસ્માદાગ્નિર્દદે દિવ આ પૃથિવ્યાઃ ॥ ૭.૦૦૬.૦૭

પ્ર વો દેવં ચિત્સહસાનમગ્નિમશ્વં ન વાજિનં હિષે નમોભિઃ ।
ભવા નો દૂતો અધ્વરસ્ય વિદ્વાન્ત્મના દેવેષુ વિવિદે મિતદ્રુઃ ॥ ૭.૦૦૭.૦૧
આ યાહ્યગ્ને પથ્યાઉ અનુ સ્વા મન્દ્રો દેવાનાં સખ્યં જુષાણઃ ।
આ સાનુ શુષ્મૈર્નદયન્પૃથિવ્યા જમ્ભેભિર્વિશ્વમુશધગ્વનાનિ ॥ ૭.૦૦૭.૦૨
પ્રાચીનો યજ્ઞઃ સુધિતં હિ બર્હિઃ પ્રીણીતે અગ્નિરીળિતો ન હોતા ।
આ માતરા વિશ્વવારે હુવાનો યતો યવિષ્ઠ જજ્ઞિષે સુશેવઃ ॥ ૭.૦૦૭.૦૩
સદ્યો અધ્વરે રથિરં જનન્ત માનુષાસો વિચેતસો ય એષામ્ ।
વિશામધાયિ વિશ્પતિર્દુરોણેઽગ્નિર્મન્દ્રો મધુવચા ઋતાવા ॥ ૭.૦૦૭.૦૪
અસાદિ વૃતો વહ્નિરાજગન્વાનગ્નિર્બ્રહ્મા નૃષદને વિધર્તા ।
દ્યૌશ્ચ યં પૃથિવી વાવૃધાતે આ યં હોતા યજતિ વિશ્વવારમ્ ॥ ૭.૦૦૭.૦૫
એતે દ્યુમ્નેભિર્વિશ્વમાતિરન્ત મન્ત્રં યે વારં નર્યા અતક્ષન્ ।
પ્ર યે વિશસ્તિરન્ત શ્રોષમાણા આ યે મે અસ્ય દીધયન્નૃતસ્ય ॥ ૭.૦૦૭.૦૬
નૂ ત્વામગ્ન ઈમહે વસિષ્ઠા ઈશાનં સૂનો સહસો વસૂનામ્ ।

ઇષં સ્તોતૃભ્યો મઘવદ્ભ્ય આનડ્યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૦૭.૦૭

ઇન્ધે રાજા સમર્યો નમોભિર્યસ્ય પ્રતીકમાહુતં ઘૃતેન ।

નરો હવ્યેભિરીળતે સબાધ આગ્નિરગ્ર ઉષસામશોચિ ॥ ૭.૦૦૮.૦૧

અયમુ ષ્ય સુમહાઁ અવેદિ હોતા મન્દ્રો મનુષો યહ્વો અગ્નિઃ ।

વિ ભા અકઃ સસૃજાનઃ પૃથિવ્યાં કૃષ્ણપવિરોષધીભિર્વવક્ષે ॥ ૭.૦૦૮.૦૨

કયા નો અગ્ને વિ વસઃ સુવૃક્તિં કામુ સ્વધામૃણવઃ શસ્યમાનઃ ।

કદા ભવેમ પતયઃ સુદત્ર રાયો વન્તારો દુષ્ટરસ્ય સાધોઃ ॥ ૭.૦૦૮.૦૩

પ્રપ્રાયમગ્નિર્ભરતસ્ય શૃણ્વે વિ યત્સૂર્યો ન રોચતે બૃહદ્ભાઃ ।

અભિ યઃ પૂરું પૃતનાસુ તસ્થૌ દ્યુતાનો દૈવ્યો અતિથિઃ શુશોચ ॥ ૭.૦૦૮.૦૪

અસન્નિત્ત્વે આહવનાનિ ભૂરિ ભુવો વિશ્વેભિઃ સુમના અનીકૈઃ ।

સ્તુતશ્ચિદગ્ને શૃણ્વિષે ગૃણાનઃ સ્વયં વર્ધસ્વ તન્વં સુજાત ॥ ૭.૦૦૮.૦૫

ઇદં વચઃ શતસાઃ સંસહસ્રમુદગ્નયે જનિષીષ્ટ દ્વિબર્હાઃ ।

શં યત્સ્તોતૃભ્ય આપયે ભવાતિ દ્યુમદમીવચાતનં રક્ષોહા ॥ ૭.૦૦૮.૦૬

નૂ ત્વામગ્ન ઈમહે વસિષ્ઠા ઈશાનં સૂનો સહસો વસૂનામ્ ।

ઇષં સ્તોતૃભ્યો મઘવદ્ભ્ય આનડ્યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૦૮.૦૭

અબોધિ જાર ઉષસામુપસ્થાદ્ધોતા મન્દ્રઃ કવિતમઃ પાવકઃ ।

દધાતિ કેતુમુભયસ્ય જન્તોર્હવ્યા દેવેષુ દ્રવિણં સુકૃત્સુ ॥ ૭.૦૦૯.૦૧

સ સુક્રતુર્યો વિ દુરઃ પણીનાં પુનાનો અર્કં પુરુભોજસં નઃ ।

હોતા મન્દ્રો વિશાં દમૂનાસ્તિરસ્તમો દદૃશે રામ્યાણામ્ ॥ ૭.૦૦૯.૦૨

અમૂરઃ કવિરદિતિર્વિવસ્વાન્સુસંસન્મિત્રો અતિથિઃ શિવો નઃ ।

ચિત્રભાનુરુષસાં ભાત્યગ્રેઽપાં ગર્ભઃ પ્રસ્વ૧ આ વિવેશ ॥ ૭.૦૦૯.૦૩

ઈળેન્યો વો મનુષો યુગેષુ સમનગા અશુચજ્જાતવેદાઃ ।

સુસંદૃશા ભાનુના યો વિભાતિ પ્રતિ ગાવઃ સમિધાનં બુધન્ત ॥ ૭.૦૦૯.૦૪

અગ્ને યાહિ દૂત્યં૧ મા રિષણ્યો દેવાઁ અચ્છા બ્રહ્મકૃતા ગણેન ।

સરસ્વતીં મરુતો અશ્વિનાપો યક્ષિ દેવાન્રત્નધેયાય વિશ્વાન્ ॥ ૭.૦૦૯.૦૫

ત્વામગ્ને સમિધાનો વસિષ્ઠો જરૂથં હન્યક્ષિ રાયે પુરંધિમ્ ।

પુરુણીથા જાતવેદો જરસ્વ યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૦૯.૦૬

ઉષો ન જારઃ પૃથુ પાજો અશ્રેદ્દવિદ્યુતદ્દીદ્યચ્છોશુચાનઃ ।
વૃષા હરિઃ શુચિરા ભાતિ ભાસા ધિયો હિન્વાન ઉશતીરજીગઃ ॥ ૭.૦૧૦.૦૧
સ્વ૧ર્ણ વસ્તોરુષસામરોચિ યજ્ઞં તન્વાના ઉશિજો ન મન્મ ।
અગ્નિર્જન્માનિ દેવ આ વિ વિદ્વાન્દ્રવદ્દૂતો દેવયાવા વનિષ્ઠઃ ॥ ૭.૦૧૦.૦૨
અચ્છા ગિરો મતયો દેવયન્તીરગ્નિં યન્તિ દ્રવિણં ભિક્ષમાણાઃ ।
સુસંદૃશં સુપ્રતીકં સ્વઞ્ચં હવ્યવાહમરતિં માનુષાણામ્ ॥ ૭.૦૧૦.૦૩
ઇન્દ્રં નો અગ્ને વસુભિઃ સજોષા રુદ્રં રુદ્રેભિરા વહા બૃહન્તમ્ ।
આદિત્યેભિરદિતિં વિશ્વજન્યાં બૃહસ્પતિમૃક્વભિર્વિશ્વવારમ્ ॥ ૭.૦૧૦.૦૪
મન્દ્રં હોતારમુશિજો યવિષ્ઠમગ્નિં વિશ ઈળતે અધ્વરેષુ ।
સ હિ ક્ષપાવાઁ અભવદ્રયીણામતન્દ્રો દૂતો યજથાય દેવાન્ ॥ ૭.૦૧૦.૦૫

મહાઁ અસ્યધ્વરસ્ય પ્રકેતો ન ઋતે ત્વદમૃતા માદયન્તે ।
આ વિશ્વેભિઃ સરથં યાહિ દેવૈર્ન્યગ્ને હોતા પ્રથમઃ સદેહ ॥ ૭.૦૧૧.૦૧
ત્વામીળતે અજિરં દૂત્યાય હવિષ્મન્તઃ સદમિન્માનુષાસઃ ।
યસ્ય દેવૈરાસદો બર્હિરગ્નેઽહાન્યસ્મૈ સુદિના ભવન્તિ ॥ ૭.૦૧૧.૦૨
ત્રિશ્ચિદક્તોઃ પ્ર ચિકિતુર્વસૂનિ ત્વે અન્તર્દાશુષે મર્ત્યાય ।
મનુષ્વદગ્ન ઇહ યક્ષિ દેવાન્ભવા નો દૂતો અભિશસ્તિપાવા ॥ ૭.૦૧૧.૦૩
અગ્નિરીશે બૃહતો અધ્વરસ્યાગ્નિર્વિશ્વસ્ય હવિષઃ કૃતસ્ય ।
ક્રતું હ્યસ્ય વસવો જુષન્તાથા દેવા દધિરે હવ્યવાહમ્ ॥ ૭.૦૧૧.૦૪
આગ્ને વહ હવિરદ્યાય દેવાનિન્દ્રજ્યેષ્ઠાસ ઇહ માદયન્તામ્ ।
ઇમં યજ્ઞં દિવિ દેવેષુ ધેહિ યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૧૧.૦૫

અગન્મ મહા નમસા યવિષ્ઠં યો દીદાય સમિદ્ધઃ સ્વે દુરોણે ।
ચિત્રભાનું રોદસી અન્તરુર્વી સ્વાહુતં વિશ્વતઃ પ્રત્યઞ્ચમ્ ॥ ૭.૦૧૨.૦૧
સ મહ્ના વિશ્વા દુરિતાનિ સાહ્વાનગ્નિઃ ષ્ટવે દમ આ જાતવેદાઃ ।
સ નો રક્ષિષદ્દુરિતાદવદ્યાદસ્માન્ગૃણત ઉત નો મઘોનઃ ॥ ૭.૦૧૨.૦૨
ત્વં વરુણ ઉત મિત્રો અગ્ને ત્વાં વર્ધન્તિ મતિભિર્વસિષ્ઠાઃ ।
ત્વે વસુ સુષણનાનિ સન્તુ યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૧૨.૦૩
પ્રાગ્નયે વિશ્વશુચે ધિયંધેઽસુરઘ્ને મન્મ ધીતિં ભરધ્વમ્ ।

ભરે હવિર્ન બર્હિષિ પ્રીણાનો વૈશ્વાનરાય યતયે મતીનામ્ ॥ ૭.૦૧૩.૦૧
ત્વમગ્ને શોચિષા શોશુચાન આ રોદસી અપૃણા જાયમાનઃ ।
ત્વં દેવાઁ અભિશસ્તેરમુઞ્ચો વૈશ્વાનર જાતવેદો મહિત્વા ॥ ૭.૦૧૩.૦૨
જાતો યદગ્ને ભુવના વ્યખ્યઃ પશૂન્ન ગોપા ઇર્યઃ પરિજ્મા ।
વૈશ્વાનર બ્રહ્મણે વિન્દ ગાતું યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૧૩.૦૩
સમિધા જાતવેદસે દેવાય દેવહૂતિભિઃ ।
હવિર્ભિઃ શુક્રશોચિષે નમસ્વિનો વયં દાશેમાગ્નયે ॥ ૭.૦૧૪.૦૧
વયં તે અગ્ને સમિધા વિધેમ વયં દાશેમ સુષ્ટુતી યજત્ર ।
વયં ઘૃતેનાધ્વરસ્ય હોતર્વયં દેવ હવિષા ભદ્રશોચે ॥ ૭.૦૧૪.૦૨
આ નો દેવેભિરુપ દેવહૂતિમગ્ને યાહિ વષટ્કૃતિં જુષાણઃ ।
તુભ્યં દેવાય દાશતઃ સ્યામ યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૧૪.૦૩
ઉપસદ્યાય મીળ્હુષ આસ્યે જુહુતા હવિઃ ।
યો નો નેદિષ્ઠમાપ્યમ્ ॥ ૭.૦૧૫.૦૧
યઃ પઞ્ચ ચર્ષણીરભિ નિષસાદ દમેદમે ।
કવિર્ગૃહપતિર્યુવા ॥ ૭.૦૧૫.૦૨
સ નો વેદો અમાત્યમગ્ની રક્ષતુ વિશ્વતઃ ।
ઉતાસ્માન્પાત્વંહસઃ ॥ ૭.૦૧૫.૦૩
નવં નુ સ્તોમમગ્નયે દિવઃ શ્યેનાય જીજનમ્ ।
વસ્વઃ કુવિદ્વનાતિ નઃ ॥ ૭.૦૧૫.૦૪
સ્પાર્હા યસ્ય શ્રિયો દૃશે રયિર્વીરવતો યથા ।
અગ્રે યજ્ઞસ્ય શોચતઃ ॥ ૭.૦૧૫.૦૫
સેમાં વેતુ વષટ્કૃતિમગ્નિર્જુષત નો ગિરઃ ।
યજિષ્ઠો હવ્યવાહનઃ ॥ ૭.૦૧૫.૦૬
નિ ત્વા નક્ષ્ય વિશ્પતે દ્યુમન્તં દેવ ધીમહિ ।
સુવીરમગ્ન આહુત ॥ ૭.૦૧૫.૦૭
ક્ષપ ઉસ્રશ્ચ દીદિહિ સ્વગ્નયસ્ત્વયા વયમ્ ।
સુવીરસ્ત્વમસ્મયુઃ ॥ ૭.૦૧૫.૦૮

ઉપ ત્વા સાતયે નરો વિપ્રાસો યન્તિ ધીતિભિઃ ।
ઉપાક્ષરા સહસ્રિણી ॥ ૭.૦૧૫.૦૯
અગ્ની રક્ષાંસિ સેધતિ શુક્રશોચિરમર્ત્યઃ ।
શુચિઃ પાવક ઈડ્યઃ ॥ ૭.૦૧૫.૧૦
સ નો રાધાંસ્યા ભરેશાનઃ સહસો યહો ।
ભગશ્ચ દાતુ વાર્યમ્ ॥ ૭.૦૧૫.૧૧
ત્વમગ્ને વીરવદ્યશો દેવશ્ચ સવિતા ભગઃ ।
દિતિશ્ચ દાતિ વાર્યમ્ ॥ ૭.૦૧૫.૧૨
અગ્ને રક્ષા ણો અંહસઃ પ્રતિ ષ્મ દેવ રીષતઃ ।
તપિષ્ઠૈરજરો દહ ॥ ૭.૦૧૫.૧૩
અધા મહી ન આયસ્યનાધૃષ્ટો નૃપીતયે ।
પૂર્ભવા શતભુજિઃ ॥ ૭.૦૧૫.૧૪
ત્વં નઃ પાહ્યંહસો દોષાવસ્તરઘાયતઃ ।
દિવા નક્તમદાભ્ય ॥ ૭.૦૧૫.૧૫

એના વો અગ્નિં નમસોર્જો નપાતમા હુવે ।
પ્રિયં ચેતિષ્ઠમરતિં સ્વધ્વરં વિશ્વસ્ય દૂતમમૃતમ્ ॥ ૭.૦૧૬.૦૧
સ યોજતે અરુષા વિશ્વભોજસા સ દુદ્રવત્સ્વાહુતઃ ।
સુબ્રહ્મા યજ્ઞઃ સુશમી વસૂનાં દેવં રાધો જનાનામ્ ॥ ૭.૦૧૬.૦૨
ઉદસ્ય શોચિરસ્થાદાજુહ્વાનસ્ય મીળ્હુષઃ ।
ઉદ્ધૂમાસો અરુષાસો દિવિસ્પૃશઃ સમગ્નિમિન્ધતે નરઃ ॥ ૭.૦૧૬.૦૩
તં ત્વા દૂતં કૃણ્મહે યશસ્તમં દેવાઁ આ વીતયે વહ ।
વિશ્વા સૂનો સહસો મર્તભોજના રાસ્વ તદ્યત્ત્વેમહે ॥ ૭.૦૧૬.૦૪
ત્વમગ્ને ગૃહપતિસ્ત્વં હોતા નો અધ્વરે ।
ત્વં પોતા વિશ્વવાર પ્રચેતા યક્ષિ વેષિ ચ વાર્યમ્ ॥ ૭.૦૧૬.૦૫
કૃધિ રત્નં યજમાનાય સુક્રતો ત્વં હિ રત્નધા અસિ ।
આ ન ઋતે શિશીહિ વિશ્વમૃત્વિજં સુશંસો યશ્ચ દક્ષતે ॥ ૭.૦૧૬.૦૬
ત્વે અગ્ને સ્વાહુત પ્રિયાસઃ સન્તુ સૂરયઃ ।

યન્તારો યે મઘવાનો જનાનામૂર્વાન્દયન્ત ગોનામ્ ॥ ૭.૦૧૬.૦૭
યેષામિળા ઘૃતહસ્તા દુરોણ આઁ અપિ પ્રાતા નિષીદતિ ।
તાઁસ્ત્રાયસ્વ સહસ્ય દ્રુહો નિદો યચ્છા નઃ શર્મ દીર્ઘશ્રુત્ ॥ ૭.૦૧૬.૦૮
સ મન્દ્રયા ચ જિહ્વયા વહ્નિરાસા વિદુષ્ટરઃ ।
અગ્ને રયિં મઘવદ્ભ્યો ન આ વહ હવ્યદાતિં ચ સૂદય ॥ ૭.૦૧૬.૦૯
યે રાધાંસિ દદત્યશ્વ્યા મઘા કામેન શ્રવસો મહઃ ।
તાઁ અંહસઃ પિપૃહિ પર્તૃભિષ્ટ્વં શતં પૂર્ભિર્યવિષ્ઠ્ય ॥ ૭.૦૧૬.૧૦
દેવો વો દ્રવિણોદાઃ પૂર્ણાં વિવષ્ટ્યાસિચમ્ ।
ઉદ્વા સિઞ્ચધ્વમુપ વા પૃણધ્વમાદિદ્વો દેવ ઓહતે ॥ ૭.૦૧૬.૧૧
તં હોતારમધ્વરસ્ય પ્રચેતસં વહ્નિં દેવા અકૃણ્વત ।
દધાતિ રત્નં વિધતે સુવીર્યમગ્નિર્જનાય દાશુષે ॥ ૭.૦૧૬.૧૨
અગ્ને ભવ સુષમિધા સમિદ્ધ ઉત બર્હિરુર્વિયા વિ સ્તૃણીતામ્ ॥ ૭.૦૧૭.૦૧
ઉત દ્વાર ઉશતીર્વિ શ્રયન્તામુત દેવાઁ ઉશત આ વહેહ ॥ ૭.૦૧૭.૦૨
અગ્ને વીહિ હવિષા યક્ષિ દેવાન્સ્વધ્વરા કૃણુહિ જાતવેદઃ ॥ ૭.૦૧૭.૦૩
સ્વધ્વરા કરતિ જાતવેદા યક્ષદ્દેવાઁ અમૃતાન્પિપ્રયચ્ચ ॥ ૭.૦૧૭.૦૪
વંસ્વ વિશ્વા વાર્યાણિ પ્રચેતઃ સત્યા ભવન્ત્વાશિષો નો અદ્ય ॥ ૭.૦૧૭.૦૫
ત્વામુ તે દધિરે હવ્યવાહં દેવાસો અગ્ન ઊર્જ આ નપાતમ્ ॥ ૭.૦૧૭.૦૬
તે તે દેવાય દાશતઃ સ્યામ મહો નો રત્ના વિ દધ ઇયાનઃ ॥ ૭.૦૧૭.૦૭
ત્વે હ યત્પિતરશ્ચિન્ન ઇન્દ્ર વિશ્વા વામા જરિતારો અસન્વન્ ।
ત્વે ગાવઃ સુદુઘાસ્ત્વે હ્યશ્વાસ્ત્વં વસુ દેવયતે વનિષ્ઠઃ ॥ ૭.૦૧૮.૦૧
રાજેવ હિ જનિભિઃ ક્ષેષ્યેવાવ દ્યુભિરભિ વિદુષ્કવિઃ સન્ ।
પિશા ગિરો મઘવન્ગોભિરશ્વૈસ્ત્વાયતઃ શિશીહિ રાયે અસ્માન્ ॥ ૭.૦૧૮.૦૨
ઇમા ઉ ત્વા પસ્પૃધાનાસો અત્ર મન્દ્રા ગિરો દેવયન્તીરુપ સ્થુઃ ।
અર્વાચી તે પથ્યા રાય એતુ સ્યામ તે સુમતાવિન્દ્ર શર્મન્ ॥ ૭.૦૧૮.૦૩
ધેનું ન ત્વા સૂયવસે દુદુક્ષન્નુપ બ્રહ્માણિ સસૃજે વસિષ્ઠઃ ।
ત્વામિન્મે ગોપતિં વિશ્વ આહા ન ઇન્દ્રઃ સુમતિં ગન્ત્વચ્છ ॥ ૭.૦૧૮.૦૪
અર્ણાંસિ ચિત્પપ્રથાના સુદાસ ઇન્દ્રો ગાધાન્યકૃણોત્સુપારા ।

શર્ધન્તં શિમ્યુમુચથસ્ય નવ્યઃ શાપં સિન્ધૂનામકૃણોદશસ્તીઃ ॥ ૭.૦૧૮.૦૫
પુરોળા ઇત્તુર્વશો યક્ષુરાસીદ્રાયે મત્સ્યાસો નિશિતા અપીવ ।
શ્રુષ્ટિં ચક્રુર્ભૃગવો દ્રુહ્યવશ્ચ સખા સખાયમતરદ્વિષૂચોઃ ॥ ૭.૦૧૮.૦૬
આ પક્થાસો ભલાનસો ભનન્તાલિનાસો વિષાણિનઃ શિવાસઃ ।
આ યોઽનયત્સધમા આર્યસ્ય ગવ્યા તૃત્સુભ્યો અજગન્યુધા નૄન્ ॥ ૭.૦૧૮.૦૭
દુરાધ્યો૩ અદિતિં સ્રેવયન્તોઽચેતસો વિ જગૃભ્રે પરુષ્ણીમ્ ।
મહ્નાવિવ્યક્પૃથિવીં પત્યમાનઃ પશુષ્કવિરશયચ્ચાયમાનઃ ॥ ૭.૦૧૮.૦૮
ઈયુરર્થં ન ન્યર્થં પરુષ્ણીમાશુશ્ચનેદભિપિત્વં જગામ ।
સુદાસ ઇન્દ્રઃ સુતુકાઁ અમિત્રાનરન્ધયન્માનુષે વધ્રિવાચઃ ॥ ૭.૦૧૮.૦૯
ઈયુર્ગાવો ન યવસાદગોપા યથાકૃતમભિ મિત્રં ચિતાસઃ ।
પૃશ્નિગાવઃ પૃશ્નિનિપ્રેષિતાસઃ શ્રુષ્ટિં ચક્રુર્નિયુતો રન્તયશ્ચ ॥ ૭.૦૧૮.૧૦
એકં ચ યો વિંશતિં ચ શ્રવસ્યા વૈકર્ણયોર્જનાન્રાજા ન્યસ્તઃ ।
દસ્મો ન સદ્મન્નિ શિશાતિ બર્હિઃ શૂરઃ સર્ગમકૃણોદિન્દ્ર એષામ્ ॥ ૭.૦૧૮.૧૧
અધ શ્રુતં કવષં વૃદ્ધમપ્સ્વનુ દ્રુહ્યું નિ વૃણગ્વજ્રબાહુઃ ।
વૃણાના અત્ર સખ્યાય સખ્યં ત્વાયન્તો યે અમદન્નનુ ત્વા ॥ ૭.૦૧૮.૧૨
વિ સદ્યો વિશ્વા દૃંહિતાન્યેષામિન્દ્રઃ પુરઃ સહસા સપ્ત દર્દઃ ।
વ્યાનવસ્ય તૃત્સવે ગયં ભાગ્જેષ્મ પૂરું વિદથે મૃધ્રવાચમ્ ॥ ૭.૦૧૮.૧૩
નિ ગવ્યવોઽનવો દ્રુહ્યવશ્ચ ષષ્ટિઃ શતા સુષુપુઃ ષટ્ સહસ્રા ।
ષષ્ટિર્વીરાસો અધિ ષડ્દુવોયુ વિશ્વેદિન્દ્રસ્ય વીર્યા કૃતાનિ ॥ ૭.૦૧૮.૧૪
ઇન્દ્રેણૈતે તૃત્સવો વેવિષાણા આપો ન સૃષ્ટા અધવન્ત નીચીઃ ।
દુર્મિત્રાસઃ પ્રકલવિન્મિમાના જહુર્વિશ્વાનિ ભોજના સુદાસે ॥ ૭.૦૧૮.૧૫
અર્ધં વીરસ્ય શ◌ૃતપામનિન્દ્રં પરા શર્ધન્તં નુનુદે અભિ ક્ષામ્ ।
ઇન્દ્રો મન્યું મન્યુમ્યો મિમાય ભેજે પથો વર્તનિં પત્યમાનઃ ॥ ૭.૦૧૮.૧૬
આધ્રેણ ચિત્તદ્વેકં ચકાર સિંહ્યં ચિત્પેત્વેના જઘાન ।
અવ સ્રક્તીર્વેશ્યાવૃશ્ચદિન્દ્રઃ પ્રાયચ્છદ્વિશ્વા ભોજના સુદાસે ॥ ૭.૦૧૮.૧૭
શશ્વન્તો હિ શત્રવો રારધુષ્ટે ભેદસ્ય ચિચ્છર્ધતો વિન્દ રન્ધિમ્ ।
મર્તાઁ એનઃ સ્તુવતો યઃ કૃણોતિ તિગ્મં તસ્મિન્નિ જહિ વજ્રમિન્દ્ર ॥ ૭.૦૧૮.૧૮

આવદિન્દ્રં યમુના તૃત્સવશ્ચ પ્રાત્ર ભેદં સર્વતાતા મુષાયત્ ।
અજાસશ્ચ શિગ્રવો યક્ષવશ્ચ બલિં શીર્ષાણિ જભ્રુરશ્વ્યાનિ ॥ ૭.૦૧૮.૧૯
ન ત ઇન્દ્ર સુમતયો ન રાયઃ સંચક્ષે પૂર્વા ઉષસો ન નૂત્નાઃ ।
દેવકં ચિન્માન્યમાનં જઘન્થાવ ત્મના બૃહતઃ શમ્બરં ભેત્ ॥ ૭.૦૧૮.૨૦
પ્ર યે ગૃહાદમમદુસ્ત્વાયા પરાશરઃ શતયાતુર્વસિષ્ઠઃ ।
ન તે ભોજસ્ય સખ્યં મૃષન્તાધા સૂરિભ્યઃ સુદિના વ્યુચ્છાન્ ॥ ૭.૦૧૮.૨૧
દ્વે નપ્તુર્દેવવતઃ શતે ગોર્દ્વા રથા વધૂમન્તા સુદાસઃ ।
અર્હન્નગ્ને પૈજવનસ્ય દાનં હોતેવ સદ્મ પર્યેમિ રેભન્ ॥ ૭.૦૧૮.૨૨
ચત્વારો મા પૈજવનસ્ય દાનાઃ સ્મદ્દિષ્ટયઃ કૃશનિનો નિરેકે ।
ઋજ્રાસો મા પૃથિવિષ્ઠાઃ સુદાસસ્તોકં તોકાય શ્રવસે વહન્તિ ॥ ૭.૦૧૮.૨૩
યસ્ય શ્રવો રોદસી અન્તરુર્વી શીર્ષ્ણેશીર્ષ્ણે વિબભાજા વિભક્તા ।
સપ્તેદિન્દ્રં ન સ્રવતો ગૃણન્તિ નિ યુધ્યામધિમશિશાદભીકે ॥ ૭.૦૧૮.૨૪
ઇમં નરો મરુતઃ સશ્ચતાનુ દિવોદાસં ન પિતરં સુદાસઃ ।
અવિષ્ટના પૈજવનસ્ય કેતં દૂણાશં ક્ષત્રમજરં દુવોયુ ॥ ૭.૦૧૮.૨૫
યસ્તિગ્મશ◌ૃઙ્ગો વૃષભો ન ભીમ એકઃ કૃષ્ટીશ્ચ્યાવયતિ પ્ર વિશ્વાઃ ।
યઃ શશ્વતો અદાશુષો ગયસ્ય પ્રયન્તાસિ સુષ્વિતરાય વેદઃ ॥ ૭.૦૧૯.૦૧
ત્વં હ ત્યદિન્દ્ર કુત્સમાવઃ શુશ્રૂષમાણસ્તન્વા સમર્યે ।
દાસં યચ્છુષ્ણં કુયવં ન્યસ્મા અરન્ધય આર્જુનેયાય શિક્ષન્ ॥ ૭.૦૧૯.૦૨
ત્વં ધૃષ્ણો ધૃષતા વીતહવ્યં પ્રાવો વિશ્વાભિરૂતિભિઃ સુદાસમ્ ।
પ્ર પૌરુકુત્સિં ત્રસદસ્યુમાવઃ ક્ષેત્રસાતા વૃત્રહત્યેષુ પૂરુમ્ ॥ ૭.૦૧૯.૦૩
ત્વં નૃભિર્નૃમણો દેવવીતૌ ભૂરીણિ વૃત્રા હર્યશ્વ હંસિ ।
ત્વં નિ દસ્યું ચુમુરિં ધુનિં ચાસ્વાપયો દભીતયે સુહન્તુ ॥ ૭.૦૧૯.૦૪
તવ ચ્યૌત્નાનિ વજ્રહસ્ત તાનિ નવ યત્પુરો નવતિં ચ સદ્યઃ ।
નિવેશને શતતમાવિવેષીરહઞ્ચ વૃત્રં નમુચિમુતાહન્ ॥ ૭.૦૧૯.૦૫
સના તા ત ઇન્દ્ર ભોજનાનિ રાતહવ્યાય દાશુષે સુદાસે ।
વૃષ્ણે તે હરી વૃષણા યુનજ્મિ વ્યન્તુ બ્રહ્માણિ પુરુશાક વાજમ્ ॥ ૭.૦૧૯.૦૬
મા તે અસ્યાં સહસાવન્પરિષ્ટાવઘાય ભૂમ હરિવઃ પરાદૈ ।

ત્રાયસ્વ નોઽવૃકેભિર્વરૂથૈસ્તવ પ્રિયાસઃ સૂરિષુ સ્યામ ॥ ૭.૦૧૯.૦૭
પ્રિયાસ ઇત્તે મઘવન્નભિષ્ટૌ નરો મદેમ શરણે સખાયઃ ।
નિ તુર્વશં નિ યાદ્વં શિશીહ્યતિથિગ્વાય શંસ્યં કરિષ્યન્ ॥ ૭.૦૧૯.૦૮
સદ્યશ્ચિન્નુ તે મઘવન્નભિષ્ટૌ નરઃ શંસન્ત્યુક્થશાસ ઉક્થા ।
યે તે હવેભિર્વિ પણીઁરદાશન્નસ્માન્વૃણીષ્વ યુજ્યાય તસ્મૈ ॥ ૭.૦૧૯.૦૯
એતે સ્તોમા નરાં નૃતમ તુભ્યમસ્મદ્ર્યઞ્ચો દદતો મઘાનિ ।
તેષામિન્દ્ર વૃત્રહત્યે શિવો ભૂઃ સખા ચ શૂરોઽવિતા ચ નૃણામ્ ॥ ૭.૦૧૯.૧૦
નૂ ઇન્દ્ર શૂર સ્તવમાન ઊતી બ્રહ્મજૂતસ્તન્વા વાવૃધસ્વ ।
ઉપ નો વાજાન્મિમીહ્યુપ સ્તીન્યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૧૯.૧૧

ઉગ્રો જજ્ઞે વીર્યાય સ્વધાવાઞ્ચક્રિરપો નર્યો યત્કરિષ્યન્ ।
જગ્મિર્યુવા નૃષદનમવોભિસ્ત્રાતા ન ઇન્દ્ર એનસો મહશ્ચિત્ ॥ ૭.૦૨૦.૦૧
હન્તા વૃત્રમિન્દ્રઃ શૂશુવાનઃ પ્રાવીન્નુ વીરો જરિતારમૂતી ।
કર્તા સુદાસે અહ વા ઉ લોકં દાતા વસુ મુહુરા દાશુષે ભૂત્ ॥ ૭.૦૨૦.૦૨
યુધ્મો અનર્વા ખજકૃત્સમદ્વા શૂરઃ સત્રાષાડ્જનુષેમષાળ્હઃ ।
વ્યાસ ઇન્દ્રઃ પૃતનાઃ સ્વોજા અધા વિશ્વં શત્રૂયન્તં જઘાન ॥ ૭.૦૨૦.૦૩
ઉભે ચિદિન્દ્ર રોદસી મહિત્વા પપ્રાથ તવિષીભિસ્તુવિષ્મઃ ।
નિ વજ્રમિન્દ્રો હરિવાન્મિમિક્ષન્સમન્ધસા મદેષુ વા ઉવોચ ॥ ૭.૦૨૦.૦૪
વૃષા જજાન વૃષણં રણાય તમુ ચિન્નારી નર્યં સસૂવ ।
પ્ર યઃ સેનાનીરધ નૃભ્યો અસ્તીનઃ સત્વા ગવેષણઃ સ ધૃષ્ણુઃ ॥ ૭.૦૨૦.૦૫
નૂ ચિત્સ ભ્રેષતે જનો ન રેષન્મનો યો અસ્ય ઘોરમાવિવાસાત્ ।
યજ્ઞૈર્ય ઇન્દ્રે દધતે દુવાંસિ ક્ષયત્સ રાય ઋતપા ઋતેજાઃ ॥ ૭.૦૨૦.૦૬
યદિન્દ્ર પૂર્વો અપરાય શિક્ષન્નયજ્જ્યાયાન્કનીયસો દેષ્ણમ્ ।
અમૃત ઇત્પર્યાસીત દૂરમા ચિત્ર ચિત્ર્યં ભરા રયિં નઃ ॥ ૭.૦૨૦.૦૭
યસ્ત ઇન્દ્ર પ્રિયો જનો દદાશદસન્નિરેકે અદ્રિવઃ સખા તે ।
વયં તે અસ્યાં સુમતૌ ચનિષ્ઠાઃ સ્યામ વરૂથે અઘ્નતો નૃપીતૌ ॥ ૭.૦૨૦.૦૮
એષ સ્તોમો અચિક્રદદ્વૃષા ત ઉત સ્તામુર્મઘવન્નક્રપિષ્ટ ।
રાયસ્કામો જરિતારં ત આગન્ત્વમઙ્ગ શક્ર વસ્વ આ શકો નઃ ॥ ૭.૦૨૦.૦૯

સ ન ઇન્દ્ર ત્વયતાયા ઇષે ધાસ્ત્મના ચ યે મઘવાનો જુનન્તિ ।
વસ્વી ષુ તે જરિત્રે અસ્તુ શક્તિર્યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૨૦.૧૦

અસાવિ દેવં ગોઋજીકમન્ધો ન્યસ્મિન્નિન્દ્રો જનુષેમુવોચ ।
બોધામસિ ત્વા હર્યશ્વ યજ્ઞૈર્બોધા નઃ સ્તોમમન્ધસો મદેષુ ॥ ૭.૦૨૧.૦૧
પ્ર યન્તિ યજ્ઞં વિપયન્તિ બર્હિઃ સોમમાદો વિદથે દુધ્રવાચઃ ।
ન્યુ ભ્રિયન્તે યશસો ગૃભાદા દૂરઉપબ્દો વૃષણો નૃષાચઃ ॥ ૭.૦૨૧.૦૨
ત્વમિન્દ્ર સ્રવિતવા અપસ્કઃ પરિષ્ઠિતા અહિના શૂર પૂર્વીઃ ।
ત્વદ્વાવક્રે રથ્યોઉ ન ધેના રેજન્તે વિશ્વા કૃત્રિમાણિ ભીષા ॥ ૭.૦૨૧.૦૩
ભીમો વિવેષાયુધેભિરેષામપાંસિ વિશ્વા નર્યાણિ વિદ્વાન્ ।
ઇન્દ્રઃ પુરો જર્હૃષાણો વિ દૂધોદ્વિ વજ્રહસ્તો મહિના જઘાન ॥ ૭.૦૨૧.૦૪
ન યાતવ ઇન્દ્ર જૂજુવુર્નો ન વન્દના શવિષ્ઠ વેદ્યાભિઃ ।
સ શર્ધદર્યો વિષુણસ્ય જન્તોર્મા શિશ્નદેવા અપિ ગુર્ઋતં નઃ ॥ ૭.૦૨૧.૦૫
અભિ ક્રત્વેન્દ્ર ભૂરધ જ્મન્ન તે વિવ્યઙ્મહિમાનં રજાંસિ ।
સ્વેના હિ વૃત્રં શવસા જઘન્થ ન શત્રુરન્તં વિવિદદ્યુધા તે ॥ ૭.૦૨૧.૦૬
દેવાશ્ચિત્તે અસુર્યાય પૂર્વેઽનુ ક્ષત્રાય મમિરે સહાંસિ ।
ઇન્દ્રો મઘાનિ દયતે વિષહ્યેન્દ્રં વાજસ્ય જોહુવન્ત સાતૌ ॥ ૭.૦૨૧.૦૭
કીરિશ્ચિદ્ધિ ત્વામવસે જુહાવેશાનમિન્દ્ર સૌભગસ્ય ભૂરેઃ ।
અવો બભૂથ શતમૂતે અસ્મે અભિક્ષત્તુસ્ત્વાવતો વરૂતા ॥ ૭.૦૨૧.૦૮
સખાયસ્ત ઇન્દ્ર વિશ્વહ સ્યામ નમોવૃધાસો મહિના તરુત્ર ।
વન્વન્તુ સ્મા તેઽવસા સમીકેઉઽભીતિમર્યો વનુષાં શવાંસિ ॥ ૭.૦૨૧.૦૯
સ ન ઇન્દ્ર ત્વયતાયા ઇષે ધાસ્ત્મના ચ યે મઘવાનો જુનન્તિ ।
વસ્વી ષુ તે જરિત્રે અસ્તુ શક્તિર્યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૨૧.૧૦

પિબા સોમમિન્દ્ર મન્દતુ ત્વા યં તે સુષાવ હર્યશ્વાદ્રિઃ ।
સોતુર્બાહુભ્યાં સુયતો નાર્વા ॥ ૭.૦૨૨.૦૧
યસ્તે મદો યુજ્યશ્ચારુરસ્તિ યેન વૃત્રાણિ હર્યશ્વ હંસિ ।
સ ત્વામિન્દ્ર પ્રભૂવસો મમત્તુ ॥ ૭.૦૨૨.૦૨
બોધા સુ મે મઘવન્વાચમેમાં યાં તે વસિષ્ઠો અર્ચતિ પ્રશસ્તિમ્ ।

ઇમા બ્રહ્મ સધમાદે જુષસ્વ ॥ ૭.૦૨૨.૦૩

શ્રુધી હવં વિપિપાનસ્યાદ્રેર્બોધા વિપ્રસ્યાર્ચતો મનીષામ્ ।

કૃષ્વા દુવાંસ્યન્તમા સચેમા ॥ ૭.૦૨૨.૦૪

ન તે ગિરો અપિ મૃષ્યે તુરસ્ય ન સુષ્ટુતિમસુર્યસ્ય વિદ્વાન્ ।

સદા તે નામ સ્વયશો વિવક્મિ ॥ ૭.૦૨૨.૦૫

ભૂરિ હિ તે સવના માનુષેષુ ભૂરિ મનીષી હવતે ત્વામિત્ ।

મારે અસ્મન્મઘવઞ્જ્યોક્કઃ ॥ ૭.૦૨૨.૦૬

તુભ્યેદિમા સવના શૂર વિશ્વા તુભ્યં બ્રહ્માણિ વર્ધના કૃણોમિ ।

ત્વં નૃભિર્હવ્યો વિશ્વધાસિ ॥ ૭.૦૨૨.૦૭

નૂ ચિન્નુ તે મન્યમાનસ્ય દસ્મોદશ્નુવન્તિ મહિમાનમુગ્ર ।

ન વીર્યમિન્દ્ર તે ન રાધઃ ॥ ૭.૦૨૨.૦૮

યે ચ પૂર્વ ઋષયો યે ચ નૂત્ના ઇન્દ્ર બ્રહ્માણિ જનયન્ત વિપ્રાઃ ।

અસ્મે તે સન્તુ સખ્યા શિવાનિ યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૨૨.૦૯

ઉદુ બ્રહ્માણ્યૈરત શ્રવસ્યેન્દ્રં સમર્યે મહયા વસિષ્ઠ ।

આ યો વિશ્વાનિ શવસા તતાનોપશ્રોતા મ ઈવતો વચાંસિ ॥ ૭.૦૨૩.૦૧

અયામિ ઘોષ ઇન્દ્ર દેવજામિરિરજ્યન્ત યચ્છુરુધો વિવાચિ ।

નહિ સ્વમાયુશ્ચિકિતે જનેષુ તાનીદંહાંસ્યતિ પર્ષ્યસ્માન્ ॥ ૭.૦૨૩.૦૨

યુજે રથં ગવેષણં હરિભ્યામુપ બ્રહ્માણિ જુજુષાણમસ્થુઃ ।

વિ બાધિષ્ટ સ્ય રોદસી મહિત્વેન્દ્રો વૃત્રાણ્યપ્રતી જઘન્વાન્ ॥ ૭.૦૨૩.૦૩

આપશ્ચિત્પિપ્યુઃ સ્તર્યો૩ ન ગાવો નક્ષન્નૃતં જરિતારસ્ત ઇન્દ્ર ।

યાહિ વાયુર્ન નિયુતો નો અચ્છા ત્વં હિ ધીભિર્દયસે વિ વાજાન્ ॥ ૭.૦૨૩.૦૪

તે ત્વા મદા ઇન્દ્ર માદયન્તુ શુષ્મિણં તુવિરાધસં જરિત્રે ।

એકો દેવત્રા દયસે હિ મર્તાનસ્મિઞ્છૂર સવને માદયસ્વ ॥ ૭.૦૨૩.૦૫

એવેદિન્દ્રં વૃષણં વજ્રબાહું વસિષ્ઠાસો અભ્યર્ચન્ત્યર્કૈઃ ।

સ નઃ સ્તુતો વીરવદ્ધાતુ ગોમદ્યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૨૩.૦૬

યોનિષ્ટ ઇન્દ્ર સદને અકારિ તમા નૃભિઃ પુરુહૂત પ્ર યાહિ ।

અસો યથા નોઽવિતા વૃધે ચ દદો વસૂનિ મમદશ્ચ સોમૈઃ ॥ ૭.૦૨૪.૦૧

ગૃભીતં તે મન ઇન્દ્ર દ્વિબર્હાઃ સુતઃ સોમઃ પરિષિક્તા મધૂનિ ।
વિસૃષ્ટધેના ભરતે સુવૃક્તિરિયમિન્દ્રં જોહુવતી મનીષા ॥ ૭.૦૨૪.૦૨
આ નો દિવ આ પૃથિવ્યા ઋજીષિન્નિદં બર્હિઃ સોમપેયાય યાહિ ।
વહન્તુ ત્વા હરયો મદ્ર્યઞ્ચમાઙ્ગૂષમચ્છા તવસં મદાય ॥ ૭.૦૨૪.૦૩
આ નો વિશ્વાભિરૂતિભિઃ સજોષા બ્રહ્મ જુષાણો હર્યશ્વ યાહિ ।
વરીવૃજત્સ્થવિરેભિઃ સુશિપ્રાસ્મે દધદ્વૃષણં શુષ્મમિન્દ્ર ॥ ૭.૦૨૪.૦૪
એષ સ્તોમો મહ ઉગ્રાય વાહે ધુરીવાત્યો ન વાજયન્નધાયિ ।
ઇન્દ્ર ત્વાયમર્ક ઈટ્ટે વસૂનાં દિવીવ દ્યામધિ નઃ શ્રોમતં ધાઃ ॥ ૭.૦૨૪.૦૫
એવા ન ઇન્દ્ર વાર્યસ્ય પૂર્ધિ પ્ર તે મહીં સુમતિં વેવિદામ ।
ઇષં પિન્વ મઘવદ્ભ્યઃ સુવીરાં યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૨૪.૦૬

આ તે મહ ઇન્દ્રોત્યુગ્ર સમન્યવો યત્સમરન્ત સેનાઃ ।
પતાતિ દિદ્યુન્નર્યસ્ય બાહ્વોર્મા તે મનો વિષ્વદ્ર્યગ્વિ ચારીત્ ॥ ૭.૦૨૫.૦૧
નિ દુર્ગ ઇન્દ્ર શ્નથિહ્યમિત્રાઁ અભિ યે નો મર્તાસો અમન્તિ ।
આરે તં શંસં કૃણુહિ નિનિત્સોરા નો ભર સમ્ભરણં વસૂનામ્ ॥ ૭.૦૨૫.૦૨
શતં તે શિપ્રિન્નૂતયઃ સુદાસે સહસ્રં શંસા ઉત રાતિરસ્તુ ।
જહિ વધર્વનુષો મર્ત્યસ્યાસ્મે દ્યુમ્નમધિ રત્નં ચ ધેહિ ॥ ૭.૦૨૫.૦૩
ત્વાવતો હીન્દ્ર ક્રત્વે અસ્મિ ત્વાવતોઽવિતુઃ શૂર રાતૌ ।
વિશ્વેદહાનિ તવિષીવ ઉગ્રઁ ઓકઃ કૃણુષ્વ હરિવો ન મર્ધીઃ ॥ ૭.૦૨૫.૦૪
કુત્સા એતે હર્યશ્વાય શૂષમિન્દ્રે સહો દેવજૂતમિયાનાઃ ।
સત્રા કૃધિ સુહના શૂર વૃત્રા વયં તરુત્રાઃ સનુયામ વાજમ્ ॥ ૭.૦૨૫.૦૫
એવા ન ઇન્દ્ર વાર્યસ્ય પૂર્ધિ પ્ર તે મહીં સુમતિં વેવિદામ ।
ઇષં પિન્વ મઘવદ્ભ્યઃ સુવીરાં યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૨૫.૦૬

ન સોમ ઇન્દ્રમસુતો મમાદ નાબ્રહ્માણો મઘવાનં સુતાસઃ ।
તસ્મા ઉક્થં જનયે યજ્જુજોષન્નૃવન્નવીયઃ શૃણવદ્યથા નઃ ॥ ૭.૦૨૬.૦૧
ઉક્થઉક્થે સોમ ઇન્દ્રં મમાદ નીથેનીથે મઘવાનં સુતાસઃ ।
યદીં સબાધઃ પિતરં ન પુત્રાઃ સમાનદક્ષા અવસે હવન્તે ॥ ૭.૦૨૬.૦૨
ચકાર તા કૃણવન્નૂનમન્યા યાનિ બ્રુવન્તિ વેધસઃ સુતેષુ ।

જનીરિવ પતિરેકઃ સમાનો નિ મામૃજે પુર ઇન્દ્રઃ સુ સર્વાઃ ॥ ૭.૦૨૬.૦૩
એવા તમાહુરુત શૃણ્વ ઇન્દ્ર એકો વિભક્તા તરણિર્મઘાનામ્ ।
મિથસ્તુર ઊતયો યસ્ય પૂર્વીરસ્મે ભદ્રાણિ સશ્ચત પ્રિયાણિ ॥ ૭.૦૨૬.૦૪
એવા વસિષ્ઠ ઇન્દ્રમૂતયે નૃન્કૃષ્ટીનાં વૃષભં સુતે ગૃણાતિ ।
સહસ્રિણ ઉપ નો માહિ વાજાન્યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૨૬.૦૫

ઇન્દ્રં નરો નેમધિતા હવન્તે યત્પાર્યા યુનજતે ધિયસ્તાઃ ।
શૂરો નૃષાતા શવસશ્ચકાન આ ગોમતિ વ્રજે ભજા ત્વં નઃ ॥ ૭.૦૨૭.૦૧
ય ઇન્દ્ર શુષ્મો મઘવન્તે અસ્તિ શિક્ષા સખિભ્યઃ પુરુહૂત નૃભ્યઃ ।
ત્વં હિ દૃળ્હા મઘવન્વિચેતા અપા વૃધિ પરિવૃતં ન રાધઃ ॥ ૭.૦૨૭.૦૨
ઇન્દ્રો રાજા જગતશ્ચર્ષણીનામધિ ક્ષમિ વિષુરૂપં યદસ્તિ ।
તતો દદાતિ દાશુષે વસૂનિ ચોદદ્રાધ ઉપસ્તુતશ્ચિદર્વાક્ ॥ ૭.૦૨૭.૦૩
નૂ ચિન્ન ઇન્દ્રો મઘવા સહૂતી દાનો વાજં નિ યમતે ન ઊતી ।
અનૂના યસ્ય દક્ષિણા પીપાય વામં નૃભ્યો અભિવીતા સખિભ્યઃ ॥ ૭.૦૨૭.૦૪
નૂ ઇન્દ્ર રાયે વરિવસ્કૃધી ન આ તે મનો વવૃત્યામ મઘાય ।
ગોમદશ્વાવદ્રથવદ્વ્યન્તો યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૨૭.૦૫

બ્રહ્મા ણ ઇન્દ્રોપ યાહિ વિદ્વાનર્વાઞ્ચસ્તે હરયઃ સન્તુ યુક્તાઃ ।
વિશ્વે ચિદ્ધિ ત્વા વિહવન્ત મર્તા અસ્માકમિચ્છૃણુહિ વિશ્વમિન્વ ॥ ૭.૦૨૮.૦૧
હવં ત ઇન્દ્ર મહિમા વ્યાનડ્બ્રહ્મ યત્પાસિ શવસિન્નૃષીણામ્ ।
આ યદ્વજ્રં દધિષે હસ્ત ઉગ્ર ઘોરઃ સન્ક્રત્વા જનિષ્ઠા અષાળ્હઃ ॥ ૭.૦૨૮.૦૨
તવ પ્રણીતીન્દ્ર જોહુવાનાન્સં યન્નૄન્ન રોદસી નિનેથ ।
મહે ક્ષત્રાય શવસે હિ જજ્ઞેઽતૂતુજિં ચિત્તૂતુજિરશિશ્નત્ ॥ ૭.૦૨૮.૦૩
એભિર્ન ઇન્દ્રાહભિર્દશસ્ય દુર્મિત્રાસો હિ ક્ષિતયઃ પવન્તે ।
પ્રતિ યચ્ચષ્ટે અનૃતમનેના અવ દ્વિતા વરુણો માયી નઃ સાત્ ॥ ૭.૦૨૮.૦૪
વોચેમેદિન્દ્રં મઘવાનમેનં મહો રાયો રાધસો યદ્દદન્નઃ ।
યો અર્ચતો બ્રહ્મકૃતિમવિષ્ઠો યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૨૮.૦૫

અયં સોમ ઇન્દ્ર તુભ્યં સુન્વ આ તુ પ્ર યાહિ હરિવસ્તદોકાઃ ।
પિબા ત્વ૧સ્ય સુષુતસ્ય ચારોર્દદો મઘાનિ મઘવન્નિયાનઃ ॥ ૭.૦૨૯.૦૧

બ્રહ્મન્વીર બ્રહ્મકૃતિં જુષાણોઽર્વાચીનો હરિભિર્યાહિ તૂયમ્ ।
અસ્મિન્નૂ ષુ સવને માદયસ્વોપ બ્રહ્માણિ શ઼ૃણવ ઇમા નઃ ॥ ૭.૦૨૯.૦૨
કા તે અસ્ત્યરંકૃતિઃ સૂક્તૈઃ કદા નૂનં તે મઘવન્દાશેમ ।
વિશ્વા મતીરા તતને ત્વાયાધા મ ઇન્દ્ર શ઼ૃણવો હવેમા ॥ ૭.૦૨૯.૦૩
ઉતો ઘા તે પુરુષ્યાઉ ઇદાસન્યેષાં પૂર્વેષામશ઼ૃણોરૃષીણામ્ ।
અધાહં ત્વા મઘવઞ્જોહવીમિ ત્વં ન ઇન્દ્રાસિ પ્રમતિઃ પિતેવ ॥ ૭.૦૨૯.૦૪
વોચેમેદિન્દ્રં મઘવાનમેનં મહો રાયો રાધસો યદ્દદન્નઃ ।
યો અર્ચતો બ્રહ્મકૃતિમવિષ્ઠો યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૨૯.૦૫

આ નો દેવ શવસા યાહિ શુષ્મિન્ભવા વૃધ ઇન્દ્ર રાયો અસ્ય ।
મહે નૃમ્ણાય નૃપતે સુવજ્ર મહિ ક્ષત્રાય પૌંસ્યાય શૂર ॥ ૭.૦૩૦.૦૧
હવન્ત ઉ ત્વા હવ્યં વિવાચિ તનૂષુ શૂરાઃ સૂર્યસ્ય સાતૌ ।
ત્વં વિશ્વેષુ સેન્યો જનેષુ ત્વં વૃત્રાણિ રન્ધયા સુહન્તુ ॥ ૭.૦૩૦.૦૨
અહા યદિન્દ્ર સુદિના વ્યુચ્છાન્દધો યત્કેતુમુપમં સમત્સુ ।
ન્ય૧ગ્નિઃ સીદદસુરો ન હોતા હુવાનો અત્ર સુભગાય દેવાન્ ॥ ૭.૦૩૦.૦૩
વયં તે ત ઇન્દ્ર યે ચ દેવ સ્તવન્ત શૂર દદતો મઘાનિ ।
યચ્છા સૂરિભ્ય ઉપમં વરૂથં સ્વાભુવો જરણામશ્નવન્ત ॥ ૭.૦૩૦.૦૪
વોચેમેદિન્દ્રં મઘવાનમેનં મહો રાયો રાધસો યદ્દદન્નઃ ।
યો અર્ચતો બ્રહ્મકૃતિમવિષ્ઠો યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૩૦.૦૫

પ્ર વ ઇન્દ્રાય માદનં હર્યશ્વાય ગાયત ।
સખાયઃ સોમપાવ્ને ॥ ૭.૦૩૧.૦૧
શંસેદુક્થં સુદાનવ ઉત દ્યુક્ષં યથા નરઃ ।
ચકૃમા સત્યરાધસે ॥ ૭.૦૩૧.૦૨
ત્વં ન ઇન્દ્ર વાજયુસ્ત્વં ગવ્યુઃ શતક્રતો ।
ત્વં હિરણ્યયુર્વસો ॥ ૭.૦૩૧.૦૩
વયમિન્દ્ર ત્વાયવોઽભિ પ્ર ણોનુમો વૃષન્ ।
વિદ્ધી ત્વ૧સ્ય નો વસો ॥ ૭.૦૩૧.૦૪
મા નો નિદે ચ વક્તવેઽર્યો રન્ધીરરાવ્ણે ।

ત્વે અપિ ક્રતુર્મમ ॥ ૭.૦૩૧.૦૫
ત્વં વર્માસિ સપ્રથઃ પુરોયોધશ્ચ વૃત્રહન્ ।
ત્વયા પ્રતિ બ્રુવે યુજા ॥ ૭.૦૩૧.૦૬
મહાઁ ઉતાસિ યસ્ય તેઽનુ સ્વધાવરી સહઃ ।
મમ્નાતે ઇન્દ્ર રોદસી ॥ ૭.૦૩૧.૦૭
તં ત્વા મરુત્વતી પરિ ભુવદ્વાણી સયાવરી ।
નક્ષમાણા સહ દ્યુભિઃ ॥ ૭.૦૩૧.૦૮
ઊર્ધ્વાસસ્ત્વાન્વિન્દવો ભુવન્દસ્મમુપ દ્યવિ ।
સં તે નમન્ત કૃષ્ટયઃ ॥ ૭.૦૩૧.૦૯
પ્ર વો મહે મહિવૃધે ભરધ્વં પ્રચેતસે પ્ર સુમતિં કૃણુધ્વમ્ ।
વિશઃ પૂર્વીઃ પ્ર ચરા ચર્ષણિપ્રાઃ ॥ ૭.૦૩૧.૧૦
ઉરુવ્યચસે મહિને સુવૃક્તિમિન્દ્રાય બ્રહ્મ જનયન્ત વિપ્રાઃ ।
તસ્ય વ્રતાનિ ન મિનન્તિ ધીરાઃ ॥ ૭.૦૩૧.૧૧
ઇન્દ્રં વાણીરનુત્તમન્યુમેવ સત્રા રાજાનં દધિરે સહધ્યૈ ।
હર્યશ્વાય બર્હયા સમાપીન્ ॥ ૭.૦૩૧.૧૨

મો ષુ ત્વા વાઘતશ્ચનારે અસ્મન્નિ રીરમન્ ।
આરાત્તાચ્ચિત્સધમાદં ન આ ગહીહ વા સન્નુપ શ્રુધિ ॥ ૭.૦૩૨.૦૧
ઇમે હિ તે બ્રહ્મકૃતઃ સુતે સચા મધૌ ન મક્ષ આસતે ।
ઇન્દ્રે કામં જરિતારો વસૂયવો રથે ન પાદમા દધુઃ ॥ ૭.૦૩૨.૦૨
રાયસ્કામો વજ્રહસ્તં સુદક્ષિણં પુત્રો ન પિતરં હુવે ॥ ૭.૦૩૨.૦૩
ઇમ ઇન્દ્રાય સુન્વિરે સોમાસો દધ્યાશિરઃ ।
તાઁ આ મદાય વજ્રહસ્ત પીતયે હરિભ્યાં યાહ્યોક આ ॥ ૭.૦૩૨.૦૪
શ્રવચ્છ્રુત્કર્ણ ઈયતે વસૂનાં નૂ ચિન્નો મર્ધિષદ્ગિરઃ ।
સદ્યશ્ચિદ્યઃ સહસ્રાણિ શતા દદન્નકિર્દિત્સન્તમા મિનત્ ॥ ૭.૦૩૨.૦૫
સ વીરો અપ્રતિષ્કુત ઇન્દ્રેણ શૂશુવે નૃભિઃ ।
યસ્તે ગભીરા સવનાનિ વૃત્રહન્સુનોત્યા ચ ધાવતિ ॥ ૭.૦૩૨.૦૬
ભવા વરૂથં મઘવન્મઘોનાં યત્સમજાસિ શર્ધતઃ ।

વિ ત્વાહતસ્ય વેદનં ભજેમહ્યા દૂણાશો ભરા ગયમ્ ॥ ૭.૦૩૨.૦૭

સુનોતા સોમપાવ્ને સોમમિન્દ્રાય વજ્રિણે ।

પચતા પક્તીરવસે કૃણુધ્વમિત્પૃણન્નિત્પૃણતે મયઃ ॥ ૭.૦૩૨.૦૮

મા સ્રેધત સોમિનો દક્ષતા મહે કૃણુધ્વં રાય આતુજે ।

તરણિરિજ્જયતિ ક્ષેતિ પુષ્યતિ ન દેવાસઃ કવત્નવે ॥ ૭.૦૩૨.૦૯

નકિઃ સુદાસો રથં પર્યાસ ન રીરમત્ ।

ઇન્દ્રો યસ્યાવિતા યસ્ય મરુતો ગમત્સ ગોમતિ વ્રજે ॥ ૭.૦૩૨.૧૦

ગમદ્વાજં વાજયન્નિન્દ્ર મર્ત્યો યસ્ય ત્વમવિતા ભુવઃ ।

અસ્માકં બોધ્યવિતા રથાનામસ્માકં શૂર નૃણામ્ ॥ ૭.૦૩૨.૧૧

ઉદિન્ન્વસ્ય રિચ્યતેંऽશો ધનં ન જિગ્યુષઃ ।

ય ઇન્દ્રો હરિવાન્ન દભન્તિ તં રિપો દક્ષં દધાતિ સોમિનિ ॥ ૭.૦૩૨.૧૨

મન્ત્રમખર્વં સુધિતં સુપેશસં દધાત યજ્ઞિયેષ્વા ।

પૂર્વીશ્ચન પ્રસિતયસ્તરન્તિ તં ય ઇન્દ્રે કર્મણા ભુવત્ ॥ ૭.૦૩૨.૧૩

કસ્તમિન્દ્ર ત્વાવસુમા મર્ત્યો દધર્ષતિ ।

શ્રદ્ધા ઇત્તે મઘવન્પાર્યે દિવિ વાજી વાજં સિષાસતિ ॥ ૭.૦૩૨.૧૪

મઘોનઃ સ્મ વૃત્રહત્યેષુ ચોદય યે દદતિ પ્રિયા વસુ ।

તવ પ્રણીતી હર્યશ્વ સૂરિભિર્વિશ્વા તરેમ દુરિતા ॥ ૭.૦૩૨.૧૫

તવેદિન્દ્રાવમં વસુ ત્વં પુષ્યસિ મધ્યમમ્ ।

સત્રા વિશ્વસ્ય પરમસ્ય રાજસિ નકિષ્ટ્વા ગોષુ વૃણ્વતે ॥ ૭.૦૩૨.૧૬

ત્વં વિશ્વસ્ય ધનદા અસિ શ્રુતો ય ઈં ભવન્ત્યાજયઃ ।

તવાયં વિશ્વઃ પુરુહૂત પાર્થિવોऽવસ્યુર્નામ ભિક્ષતે ॥ ૭.૦૩૨.૧૭

યદિન્દ્ર યાવતસ્ત્વમેતાવદહમીશીય ।

સ્તોતારમિદ્દિધિષેય રદાવસો ન પાપત્વાય રાસીય ॥ ૭.૦૩૨.૧૮

શિક્ષેયમિન્મહયતે દિવેદિવે રાય આ કુહચિદ્વિદે ।

નહિ ત્વદન્યન્મઘવન્ન આપ્યં વસ્યો અસ્તિ પિતા ચન ॥ ૭.૦૩૨.૧૯

તરણિરિત્સિષાસતિ વાજં પુરંધ્યા યુજા ।

આ વ ઇન્દ્રં પુરુહૂતં નમે ગિરા નેમિં તષ્ટેવ સુદ્ર્વમ્ ॥ ૭.૦૩૨.૨૦

ન દુષ્ટુતી મર્ત્યો વિન્દતે વસુ ન સ્રેધન્તં રયિર્નશત્ ।
સુશક્તિરિન્મઘવન્તુભ્યં માવતે દેષ્ણં યત્પાર્યે દિવિ ॥ ૭.૦૩૨.૨૧
અભિ ત્વા શૂર નોનુમોઽદુગ્ધા ઇવ ધેનવઃ ।
ઈશાનમસ્ય જગતઃ સ્વર્દૃશમીશાનમિન્દ્ર તસ્થુષઃ ॥ ૭.૦૩૨.૨૨
ન ત્વાવાઁ અન્યો દિવ્યો ન પાર્થિવો ન જાતો ન જનિષ્યતે ।
અશ્વાયન્તો મઘવન્નિન્દ્ર વાજિનો ગવ્યન્તસ્ત્વા હવામહે ॥ ૭.૦૩૨.૨૩
અભી ષતસ્તદા ભરેન્દ્ર જ્યાયઃ કનીયસઃ ।
પુરૂવસુર્હિ મઘવન્સનાદસિ ભરેભરે ચ હવ્યઃ ॥ ૭.૦૩૨.૨૪
પરા ણુદસ્વ મઘવન્નમિત્રાન્સુવેદા નો વસૂ કૃધિ ।
અસ્માકં બોધ્યવિતા મહાધને ભવા વૃધઃ સખીનામ્ ॥ ૭.૦૩૨.૨૫
ઇન્દ્ર ક્રતું ન આ ભર પિતા પુત્રેભ્યો યથા ।
શિક્ષા ણો અસ્મિન્પુરુહૂત યામનિ જીવા જ્યોતિરશીમહિ ॥ ૭.૦૩૨.૨૬
મા નો અજ્ઞાતા વૃજના દુરાધ્યોઽ માશિવાસો અવ ક્રમુઃ ।
ત્વયા વયં પ્રવતઃ શશ્વતીરપોઽતિ શૂર તરામસિ ॥ ૭.૦૩૨.૨૭
શ્વિત્યઞ્ચો મા દક્ષિણતસ્કપર્દા ધિયંજિન્વાસો અભિ હિ પ્રમન્દુઃ ।
ઉત્તિષ્ઠન્વોચે પરિ બર્હિષો નૄન્ન મે દૂરાદવિતવે વસિષ્ઠાઃ ॥ ૭.૦૩૩.૦૧
દૂરાદિન્દ્રમનયન્ના સુતેન તિરો વૈશન્તમતિ પાન્તમુગ્રમ્ ।
પાશદ્યુમ્નસ્ય વાયતસ્ય સોમાત્સુતાદિન્દ્રોઽવૃણીતા વસિષ્ઠાન્ ॥ ૭.૦૩૩.૦૨
એવેન્નુ કં સિન્ધુમેભિસ્તતારેવેન્નુ કં ભેદમેભિર્જઘાન ।
એવેન્નુ કં દાશરાજ્ઞે સુદાસં પ્રાવદિન્દ્રો બ્રહ્મણા વો વસિષ્ઠાઃ ॥ ૭.૦૩૩.૦૩
જુષ્ટી નરો બ્રહ્મણા વઃ પિતૄણામક્ષમવ્યયં ન કિલા રિષાથ ।
યચ્છક્વરીષુ બૃહતા રવેણેન્દ્રે શુષ્મમદધાતા વસિષ્ઠાઃ ॥ ૭.૦૩૩.૦૪
ઉદ્દ્યામિવેત્તૃષ્ણજો નાથિતાસોઽદીધયુર્દાશરાજ્ઞે વૃતાસઃ ।
વસિષ્ઠસ્ય સ્તુવત ઇન્દ્રો અશ્રોદુરું તૃત્સુભ્યો અકૃણોદુ લોકમ્ ॥ ૭.૦૩૩.૦૫
દણ્ડા ઇવેદ્ગોઅજનાસ આસન્પરિચ્છિન્ના ભરતા અર્ભકાસઃ ।
અભવચ્ચ પુરએતા વસિષ્ઠ આદિત્તૃત્સૂનાં વિશો અપ્રથન્ત ॥ ૭.૦૩૩.૦૬
ત્રયઃ કૃણ્વન્તિ ભુવનેષુ રેતસ્તિસ્રઃ પ્રજા આર્યા જ્યોતિરગ્રાઃ ।

ત્રયો ઘર્માસ ઉષસં સચન્તે સર્વાઁ ઇત્તાઁ અનુ વિદુર્વસિષ્ઠાઃ ॥ ૭.૦૩૩.૦૭
સૂર્યસ્યેવ વક્ષથો જ્યોતિરેષાં સમુદ્રસ્યેવ મહિમા ગભીરઃ ।
વાતસ્યેવ પ્રજવો નાન્યેન સ્તોમો વસિષ્ઠા અન્વેતવે વઃ ॥ ૭.૦૩૩.૦૮
ત ઇન્નિણ્યં હૃદયસ્ય પ્રકેતૈઃ સહસ્રવલ્શમભિ સં ચરન્તિ ।
યમેન તતં પરિધિં વયન્તોઽપ્સરસ ઉપ સેદુર્વસિષ્ઠાઃ ॥ ૭.૦૩૩.૦૯
વિદ્યુતો જ્યોતિઃ પરિ સંજિહાનં મિત્રાવરુણા યદપશ્યતાં ત્વા ।
તત્તે જન્મોતૈકં વસિષ્ઠાગસ્ત્યો યત્ત્વા વિશ આજભાર ॥ ૭.૦૩૩.૧૦
ઉતાસિ મૈત્રાવરુણો વસિષ્ઠોર્વશ્યા બ્રહ્મન્મનસોઽધિ જાતઃ ।
દ્રપ્સં સ્કન્નં બ્રહ્મણા દૈવ્યેન વિશ્વે દેવાઃ પુષ્કરે ત્વાદદન્ત ॥ ૭.૦૩૩.૧૧
સ પ્રકેત ઉભયસ્ય પ્રવિદ્વાન્સહસ્રદાન ઉત વા સદાનઃ ।
યમેન તતં પરિધિં વયિષ્યન્નપ્સરસઃ પરિ જજ્ઞે વસિષ્ઠઃ ॥ ૭.૦૩૩.૧૨
સત્રે હ જાતાવિષિતા નમોભિઃ કુમ્ભે રેતઃ સિષિચતુઃ સમાનમ્ ।
તતો હ માન ઉદિયાય મધ્યાત્તતો જાતમૃષિમાહુર્વસિષ્ઠમ્ ॥ ૭.૦૩૩.૧૩
ઉક્થભૃતં સામભૃતં બિભર્તિ ગ્રાવાણં બિભ્રત્પ્ર વદાત્યગ્રે ।
ઉપૈનમાધ્વં સુમનસ્યમાના આ વો ગચ્છાતિ પ્રતૃદો વસિષ્ઠઃ ॥ ૭.૦૩૩.૧૪

પ્ર શુક્રૈતુ દેવી મનીષા અસ્મત્સુતષ્ટો રથો ન વાજી ॥ ૭.૦૩૪.૦૧
વિદુઃ પૃથિવ્યા દિવો જનિત્રં શૃણ્વન્ત્યાપો અધ ક્ષરન્તીઃ ॥ ૭.૦૩૪.૦૨
આપશ્ચિદસ્મૈ પિન્વન્ત પૃથ્વીર્વૃત્રેષુ શૂરા મંસન્ત ઉગ્રાઃ ॥ ૭.૦૩૪.૦૩
આ ધૂર્ષ્વસ્મૈ દધાતાશ્વાનિન્દ્રો ન વજ્રી હિરણ્યબાહુઃ ॥ ૭.૦૩૪.૦૪
અભિ પ્ર સ્થાતાહેવ યજ્ઞં યાતેવ પત્મન્ત્મના હિનોત ॥ ૭.૦૩૪.૦૫
ત્મના સમત્સુ હિનોત યજ્ઞં દધાત કેતું જનાય વીરમ્ ॥ ૭.૦૩૪.૦૬
ઉદસ્ય શુષ્માદ્ભાનુર્નાર્ત બિભર્તિ ભારં પૃથિવી ન ભૂમ ॥ ૭.૦૩૪.૦૭
હ્વયામિ દેવાઁ અયાતુરગ્ને સાધન્નૃતેન ધિયં દધામિ ॥ ૭.૦૩૪.૦૮
અભિ વો દેવીં ધિયં દધિધ્વં પ્ર વો દેવત્રા વાચં કૃણુધ્વમ્ ॥ ૭.૦૩૪.૦૯
આ ચષ્ટ આસાં પાથો નદીનાં વરુણ ઉગ્રઃ સહસ્રચક્ષાઃ ॥ ૭.૦૩૪.૧૦
રાજા રાષ્ટ્રાનાં પેશો નદીનામનુત્તમસ્મૈ ક્ષત્રં વિશ્વાયુ ॥ ૭.૦૩૪.૧૧
અવિષ્ટો અસ્માન્વિશ્વાસુ વિક્ષ્વદ્યું કૃણોત શંસં નિનિત્સોઃ ॥ ૭.૦૩૪.૧૨

વ્યેતુ દિદ્યુદ્દ્વિષામશેવા યુયોત વિષ્વગ્રપસ્તનૂનામ્ ॥ ૭.૦૩૪.૧૩
અવીન્નો અગ્નિર્હવ્યાન્નમોભિઃ પ્રેષ્ઠો અસ્મા અધાયિ સ્તોમઃ ॥ ૭.૦૩૪.૧૪
સજૂર્દેવેભિરપાં નપાતં સખાયં કૃધ્વં શિવો નો અસ્તુ ॥ ૭.૦૩૪.૧૫
અબ્જામુક્થૈરહિં ગૃણીષે બુધ્ને નદીનાં રજસ્સુ ષીદન્ ॥ ૭.૦૩૪.૧૬
મા નોઽહિર્બુધ્ન્યો રિષે ધાન્મા યજ્ઞો અસ્ય સ્રિધદૃતાયોઃ ॥ ૭.૦૩૪.૧૭
ઉત ન એષુ નૃષુ શ્રવો ધુઃ પ્ર રાયે યન્તુ શર્ધન્તો અર્યઃ ॥ ૭.૦૩૪.૧૮
તપન્તિ શત્રું સ્વર્ણ ભૂમા મહાસેનાસો અમેભિરેષામ્ ॥ ૭.૦૩૪.૧૯
આ યન્નઃ પત્નીર્ગમન્ત્યચ્છા ત્વષ્ટા સુપાણિર્દધાતુ વીરાન્ ॥ ૭.૦૩૪.૨૦
પ્રતિ નઃ સ્તોમં ત્વષ્ટા જુષેત સ્યાદસ્મે અરમતિર્વસૂયુઃ ॥ ૭.૦૩૪.૨૧
તા નો રાસન્રાતિષાચો વસૂન્યા રોદસી વરુણાની શ઼ૃણોતુ ।
વરૂત્રીભિઃ સુશરણો નો અસ્તુ ત્વષ્ટા સુદત્રો વિ દધાતુ રાયઃ ॥ ૭.૦૩૪.૨૨
તન્નો રાયઃ પર્વતાસ્તન્ન આપસ્તદ્રાતિષાચ ઓષધીરુત દ્યૌઃ ।
વનસ્પતિભિઃ પૃથિવી સજોષા ઉભે રોદસી પરિ પાસતો નઃ ॥ ૭.૦૩૪.૨૩
અનુ તદુર્વી રોદસી જિહાતામનુ દ્યુક્ષો વરુણ ઇન્દ્રસખા ।
અનુ વિશ્વે મરુતો યે સહાસો રાયઃ સ્યામ ધરુણં ધિયધ્યૈ ॥ ૭.૦૩૪.૨૪
તન્ન ઇન્દ્રો વરુણો મિત્રો અગ્નિરાપ ઓષધીર્વનિનો જુષન્ત ।
શર્મન્સ્યામ મરુતામુપસ્થે યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૩૪.૨૫

શં ન ઇન્દ્રાગ્ની ભવતામવોભિઃ શં ન ઇન્દ્રાવરુણા રાતહવ્યા ।
શમિન્દ્રાસોમા સુવિતાય શં યોઃ શં ન ઇન્દ્રાપૂષણા વાજસાતૌ ॥ ૭.૦૩૫.૦૧
શં નો ભગઃ શમુ નઃ શંસો અસ્તુ શં નઃ પુરંધિઃ શમુ સન્તુ રાયઃ ।
શં નઃ સત્યસ્ય સુયમસ્ય શંસઃ શં નો અર્યમા પુરુજાતો અસ્તુ ॥ ૭.૦૩૫.૦૨
શં નો ધાતા શમુ ધર્તા નો અસ્તુ શં ન ઉરૂચી ભવતુ સ્વધાભિઃ ।
શં રોદસી બૃહતી શં નો અદ્રિઃ શં નો દેવાનાં સુહવાનિ સન્તુ ॥ ૭.૦૩૫.૦૩
શં નો અગ્નિર્જ્યોતિરનીકો અસ્તુ શં નો મિત્રાવરુણાવશ્વિના શમ્ ।
શં નઃ સુકૃતાં સુકૃતાનિ સન્તુ શં ન ઇષિરો અભિ વાતુ વાતઃ ॥ ૭.૦૩૫.૦૪
શં નો દ્યાવાપૃથિવી પૂર્વહૂતૌ શમન્તરિક્ષં દૃશયે નો અસ્તુ ।
શં ન ઓષધીર્વનિનો ભવન્તુ શં નો રજસસ્પતિરસ્તુ જિષ્ણુઃ ॥ ૭.૦૩૫.૦૫

શં ન ઇન્દ્રો વસુભિર્દેવો અસ્તુ શમાદિત્યેભિર્વરુણઃ સુશંસઃ ।
શં નો રુદ્રો રુદ્રેભિર્જલાષઃ શં નસ્ત્વષ્ટા ગ્નાભિરિહ શ◌ૃણોતુ ॥ ૭.૦૩૫.૦૬
શં નઃ સોમો ભવતુ બ્રહ્મ શં નઃ શં નો ગ્રાવાણઃ શમુ સન્તુ યજ્ઞાઃ ।
શં નઃ સ્વરૂણાં મિતયો ભવન્તુ શં નઃ પ્રસ્વ૧◌ઃ શમ્વસ્તુ વેદિઃ ॥ ૭.૦૩૫.૦૭
શં નઃ સૂર્ય ઉરુચક્ષા ઉદેતુ શં નશ્ચતસ્રઃ પ્રદિશો ભવન્તુ ।
શં નઃ પર્વતા ધ્રુવયો ભવન્તુ શં નઃ સિન્ધવઃ શમુ સન્ત્વાપઃ ॥ ૭.૦૩૫.૦૮
શં નો અદિતિર્ભવતુ વ્રતેભિઃ શં નો ભવન્તુ મરુતઃ સ્વર્કાઃ ।
શં નો વિષ્ણુઃ શમુ પૂષા નો અસ્તુ શં નો ભવિત્રં શમ્વસ્તુ વાયુઃ ॥ ૭.૦૩૫.૦૯
શં નો દેવઃ સવિતા ત્રાયમાણઃ શં નો ભવન્તૂષસો વિભાતીઃ ।
શં નઃ પર્જન્યો ભવતુ પ્રજાભ્યઃ શં નઃ ક્ષેત્રસ્ય પતિરસ્તુ શમ્ભુઃ ॥ ૭.૦૩૫.૧૦
શં નો દેવા વિશ્વદેવા ભવન્તુ શં સરસ્વતી સહ ધીભિરસ્તુ ।
શમભિષાચઃ શમુ રાતિષાચઃ શં નો દિવ્યાઃ પાર્થિવાઃ શં નો અપ્યાઃ ॥ ૭.૦૩૫.૧૧
શં નઃ સત્યસ્ય પતયો ભવન્તુ શં નો અર્વન્તઃ શમુ સન્તુ ગાવઃ ।
શં ન ઋભવઃ સુકૃતઃ સુહસ્તાઃ શં નો ભવન્તુ પિતરો હવેષુ ॥ ૭.૦૩૫.૧૨
શં નો અજ એકપાદ્દેવો અસ્તુ શં નોઽહિર્બુધ્ન્ય૧◌ઃ શં સમુદ્રઃ ।
શં નો અપાં નપાત્પેરુરસ્તુ શં નઃ પૃશ્નિર્ભવતુ દેવગોપા ॥ ૭.૦૩૫.૧૩
આદિત્યા રુદ્રા વસવો જુષન્તેદં બ્રહ્મ ક્રિયમાણં નવીયઃ ।
શ◌ૃણ્વન્તુ નો દિવ્યાઃ પાર્થિવાસો ગોજાતા ઉત યે યજ્ઞિયાસઃ ॥ ૭.૦૩૫.૧૪
યે દેવાનાં યજ્ઞિયા યજ્ઞિયાનાં મનોર્યજત્રા અમૃતા ઋતજ્ઞાઃ ।
તે નો રાસન્તામુરુગાયમદ્ય યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૩૫.૧૫

પ્ર બ્રહ્મૈતુ સદનાદૃતસ્ય વિ રશ્મિભિઃ સસૃજે સૂર્યો ગાઃ ।
વિ સાનુના પૃથિવી સસ્ર ઉર્વી પૃથુ પ્રતીકમધ્યેધે અગ્નિઃ ॥ ૭.૦૩૬.૦૧
ઇમાં વાં મિત્રાવરુણા સુવૃક્તિમિષં ન કૃણ્વે અસુરા નવીયઃ ।
ઇનો વામન્યઃ પદવીરદબ્ધો જનં ચ મિત્રો યતતિ બ્રુવાણઃ ॥ ૭.૦૩૬.૦૨
આ વાતસ્ય ધ્રજતો રન્ત ઇત્યા અપીપયન્ત ધેનવો ન સૂદાઃ ।
મહો દિવઃ સદને જાયમાનોઽચિક્રદદ્વૃષભઃ સસ્મિન્નૂધન્ ॥ ૭.૦૩૬.૦૩
ગિરા ય એતા યુનજદ્ધરી ત ઇન્દ્ર પ્રિયા સુરથા શૂર ધાયૂ ।

પ્ર યો મન્યું રિરિક્ષતો મિનાત્યા સુક્રતુમર્યમણં વવૃત્યામ્ ॥ ૭.૦૩૬.૦૪
યજન્તે અસ્ય સખ્યં વયશ્ચ નમસ્વિનઃ સ્વ ઋતસ્ય ધામન્ ।
વિ પૃક્ષો બાબધે નૃભિઃ સ્તવાન ઇદં નમો રુદ્રાય પ્રેષ્ઠમ્ ॥ ૭.૦૩૬.૦૫
આ યત્સાકં યશસો વાવશાનાઃ સરસ્વતી સપ્તથી સિન્ધુમાતા ।
યાઃ સુષ્વયન્ત સુદુઘાઃ સુધારા અભિ સ્વેન પયસા પીપ્યાનાઃ ॥ ૭.૦૩૬.૦૬
ઉત ત્યે નો મરુતો મન્દસાના ધિયં તોકં ચ વાજિનોઽવન્તુ ।
મા નઃ પરિ ખ્યદક્ષરા ચરન્ત્યવીવૃધન્યુજ્યં તે રયિં નઃ ॥ ૭.૦૩૬.૦૭
પ્ર વો મહીમરમતિં કૃણુધ્વં પ્ર પૂષણં વિદથ્યં૧ ન વીરમ્ ।
ભગં ધિયોઽવિતારં નો અસ્યાઃ સાતૌ વાજં રાતિષાચં પુરંધિમ્ ॥ ૭.૦૩૬.૦૮
અચ્છાયં વો મરુતઃ શ્લોક એત્વચ્છા વિષ્ણું નિષિક્તપામવોભિઃ ।
ઉત પ્રજાયૈ ગૃણતે વયો ધુર્યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૩૬.૦૯
આ વો વાહિષ્ઠો વહતુ સ્તવધ્યૈ રથો વાજા ઋભુક્ષણો અમૃક્તઃ ।
અભિ ત્રિપૃષ્ઠૈઃ સવનેષુ સોમૈર્મદે સુશિપ્રા મહભિઃ પૃણધ્વમ્ ॥ ૭.૦૩૭.૦૧
યૂયં હ રત્નં મઘવત્સુ ધત્થ સ્વર્દૃશ ઋભુક્ષણો અમૃક્તમ્ ।
સં યજ્ઞેષુ સ્વધાવન્તઃ પિબધ્વં વિ નો રાધાંસિ મતિભિર્દયધ્વમ્ ॥ ૭.૦૩૭.૦૨
ઉવોચિથ હિ મઘવન્દેષ્ણં મહો અર્ભસ્ય વસુનો વિભાગે ।
ઉભા તે પૂર્ણા વસુના ગભસ્તી ન સૂનૃતા નિ યમતે વસવ્યા ॥ ૭.૦૩૭.૦૩
ત્વમિન્દ્ર સ્વયશા ઋભુક્ષા વાજો ન સાધુરસ્તમેષ્યૃક્વા ।
વયં નુ તે દાશ્વાંસઃ સ્યામ બ્રહ્મ કૃણ્વન્તો હરિવો વસિષ્ઠાઃ ॥ ૭.૦૩૭.૦૪
સનિતાસિ પ્રવતો દાશુષે ચિદ્યાભિર્વિવેષો હર્યશ્વ ધીભિઃ ।
વવન્મા નુ તે યુજ્યાભિરૂતી કદા ન ઇન્દ્ર રાય આ દશસ્યેઃ ॥ ૭.૦૩૭.૦૫
વાસયસીવ વેધસસ્ત્વં નઃ કદા ન ઇન્દ્ર વચસો બુબોધઃ ।
અસ્તં તાત્યા ધિયા રયિં સુવીરં પૃક્ષો નો અર્વા ન્યુહીત વાજી ॥ ૭.૦૩૭.૦૬
અભિ યં દેવી નિરૃતિશ્ચિદીશે નક્ષન્ત ઇન્દ્રં શરદઃ સુપૃક્ષઃ ।
ઉપ ત્રિબન્ધુર્જરદષ્ટિમેત્યસ્વવેશં યં કૃણવન્ત મર્તાઃ ॥ ૭.૦૩૭.૦૭
આ નો રાધાંસિ સવિતઃ સ્તવધ્યા આ રાયો યન્તુ પર્વતસ્ય રાતૌ ।
સદા નો દિવ્યઃ પાયુઃ સિષક્તુ યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૩૭.૦૮

ઉદુ ષ્ય દેવઃ સવિતા યયામ હિરણ્યયીમમતિં યામશિશ્રેત્ ।
નૂનં ભગો હવ્યો માનુષેભિર્વિ યો રત્ના પુરૂવસુર્દધાતિ ॥ ૭.૦૩૮.૦૧
ઉદુ તિષ્ઠ સવિતઃ શ્રુધ્ય૧સ્ય હિરણ્યપાણે પ્રભૃતાવૃતસ્ય ।
વ્યુ૧ર્વીં પૃથ્વીમમતિં સૃજાન આ નૃભ્યો મર્તભોજનં સુવાનઃ ॥ ૭.૦૩૮.૦૨
અપિ ષ્ટુતઃ સવિતા દેવો અસ્તુ યમા ચિદ્વિશ્વે વસવો ગૃણન્તિ ।
સ નઃ સ્તોમાન્નમસ્ય૧શ્ચનો ધાદ્વિશ્વેભિઃ પાતુ પાયુભિર્નિ સૂરીન્ ॥ ૭.૦૩૮.૦૩
અભિ યં દેવ્યદિતિર્ગૃણાતિ સવં દેવસ્ય સવિતુર્જુષાણા ।
અભિ સમ્રાજો વરુણો ગૃણન્ત્યભિ મિત્રાસો અર્યમા સજોષાઃ ॥ ૭.૦૩૮.૦૪
અભિ યે મિથો વનુષઃ સપન્તે રાતિં દિવો રાતિષાચઃ પૃથિવ્યાઃ ।
અહિર્બુધ્ન્ય ઉત નઃ શ઼ૃણોતુ વરૂત્ર્યેકધેનુભિર્નિ પાતુ ॥ ૭.૦૩૮.૦૫
અનુ તન્નો જાસ્પતિર્મંસીષ્ટ રત્નં દેવસ્ય સવિતુરિયાનઃ ।
ભગમુગ્રોઽવસે જોહવીતિ ભગમનુગ્રો અધ યાતિ રત્નમ્ ॥ ૭.૦૩૮.૦૬
શં નો ભવન્તુ વાજિનો હવેષુ દેવતાતા મિતદ્રવઃ સ્વર્કાઃ ।
જમ્ભયન્તોઽહિં વૃકં રક્ષાંસિ સનેમ્યસ્મદ્યુયવન્નમીવાઃ ॥ ૭.૦૩૮.૦૭
વાજેવાજેઽવત વાજિનો નો ધનેષુ વિપ્રા અમૃતા ઋતજ્ઞાઃ ।
અસ્ય મધ્વઃ પિબત માદયધ્વં તૃપ્તા યાત પથિભિર્દેવયાનૈઃ ॥ ૭.૦૩૮.૦૮

ઊર્ધ્વો અગ્નિઃ સુમતિં વસ્વો અશ્રેત્પ્રતીચી જૂર્ણિર્દેવતાતિમેતિ ।
ભેજાતે અદ્રી રથ્યેવ પન્થામૃતં હોતા ન ઇષિતો યજાતિ ॥ ૭.૦૩૯.૦૧
પ્ર વાવૃજે સુપ્રયા બર્હિરેષામા વિશ્પતીવ બીરિટ ઇયાતે ।
વિશામક્તોરુષસઃ પૂર્વહૂતૌ વાયુઃ પૂષા સ્વસ્તયે નિયુત્વાન્ ॥ ૭.૦૩૯.૦૨
જ્મયા અત્ર વસવો રન્ત દેવા ઉરાવન્તરિક્ષે મર્જયન્ત શુભ્રાઃ ।
અર્વાક્પથ ઉરુજ્રયઃ કૃણુધ્વં શ્રોતા દૂતસ્ય જગ્મુષો નો અસ્ય ॥ ૭.૦૩૯.૦૩
તે હિ યજ્ઞેષુ યજ્ઞિયાસ ઊમાઃ સધસ્થં વિશ્વે અભિ સન્તિ દેવાઃ ।
તાઁ અધ્વર ઉશતો યક્ષ્યગ્ને શ્રુષ્ટી ભગં નાસત્યા પુરંધિમ્ ॥ ૭.૦૩૯.૦૪
આગ્ને ગિરો દિવ આ પૃથિવ્યા મિત્રં વહ વરુણમિન્દ્રમગ્નિમ્ ।
આર્યમણમદિતિં વિષ્ણુમેષાં સરસ્વતી મરુતો માદયન્તામ્ ॥ ૭.૦૩૯.૦૫
રરે હવ્યં મતિભિર્યજ્ઞિયાનાં નક્ષત્કામં મર્ત્યાનામસિન્વન્ ।

ધાતા રયિમવિદસ્યં સદાસાં સક્ષીમહિ યુજ્યેભિર્નુ દેવૈઃ ॥ ૭.૦૩૯.૦૬
નૂ રોદસી અભિષ્ટુતે વસિષ્ઠૈરૃતાવાનો વરુણો મિત્રો અગ્નિઃ ।
યચ્છન્તુ ચન્દ્રા ઉપમં નો અર્કં યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૩૯.૦૭

ઓ શ્રુષ્ટિર્વિદથ્યા૩ સમેતુ પ્રતિ સ્તોમં દધીમહિ તુરાણામ્ ।
યદદ્ય દેવઃ સવિતા સુવાતિ સ્યામાસ્ય રત્નિનો વિભાગે ॥ ૭.૦૪૦.૦૧
મિત્રસ્તન્નો વરુણો રોદસી ચ દ્યુભક્તમિન્દ્રો અર્યમા દદાતુ ।
દિદેષ્ટુ દેવ્યદિતી રેક્ણો વાયુશ્ચ યન્નિયુવૈતે ભગશ્ચ ॥ ૭.૦૪૦.૦૨
સેદુગ્રો અસ્તુ મરુતઃ સ શુષ્મી યં મર્ત્યં પૃષદશ્વા અવાથ ।
ઉતેમગ્નિઃ સરસ્વતી જુનન્તિ ન તસ્ય રાયઃ પર્યેતાસ્તિ ॥ ૭.૦૪૦.૦૩
અયં હિ નેતા વરુણ ઋતસ્ય મિત્રો રાજાનો અર્યમાપો ધુઃ ।
સુહવા દેવ્યદિતિરનર્વા તે નો અંહો અતિ પર્ષન્નરિષ્ટાન્ ॥ ૭.૦૪૦.૦૪
અસ્ય દેવસ્ય મીળ્હુષો વયા વિષ્ણોરેષસ્ય પ્રભૃથે હવિર્ભિઃ ।
વિદે હિ રુદ્રો રુદ્રિયં મહિત્વં યાસિષ્ટં વર્તિરશ્વિનાવિરાવત્ ॥ ૭.૦૪૦.૦૫
માત્ર પૂષન્નાઘૃણ ઇરસ્યો વરૂત્રી યદ્રાતિષાચશ્ચ રાસન્ ।
મયોભુવો નો અર્વન્તો નિ પાન્તુ વૃષ્ટિં પરિજ્મા વાતો દદાતુ ॥ ૭.૦૪૦.૦૬
નૂ રોદસી અભિષ્ટુતે વસિષ્ઠૈરૃતાવાનો વરુણો મિત્રો અગ્નિઃ ।
યચ્છન્તુ ચન્દ્રા ઉપમં નો અર્કં યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૪૦.૦૭

પ્રાતરગ્નિં પ્રાતરિન્દ્રં હવામહે પ્રાતર્મિત્રાવરુણા પ્રાતરશ્વિના ।
પ્રાતર્ભગં પૂષણં બ્રહ્મણસ્પતિં પ્રાતઃ સોમમુત રુદ્રં હુવેમ ॥ ૭.૦૪૧.૦૧
પ્રાતર્જિતં ભગમુગ્રં હુવેમ વયં પુત્રમદિતેર્યો વિધર્તા ।
આધ્રશ્ચિદ્યં મન્યમાનસ્તુરશ્ચિદ્રાજા ચિદ્યં ભગં ભક્ષીત્યાહ ॥ ૭.૦૪૧.૦૨
ભગ પ્રણેતર્ભગ સત્યરાધો ભગેમાં ધિયમુદવા દદન્નઃ ।
ભગ પ્ર ણો જનય ગોભિરશ્વૈર્ભગ પ્ર નૃભિર્નૃવન્તઃ સ્યામ ॥ ૭.૦૪૧.૦૩
ઉતેદાનીં ભગવન્તઃ સ્યામોત પ્રપિત્વ ઉત મધ્યે અહ્નામ્ ।
ઉતોદિતા મઘવન્સૂર્યસ્ય વયં દેવાનાં સુમતૌ સ્યામ ॥ ૭.૦૪૧.૦૪
ભગ એવ ભગવાઁ અસ્તુ દેવાસ્તેન વયં ભગવન્તઃ સ્યામ ।
તં ત્વા ભગ સર્વ ઇજ્જોહવીતિ સ નો ભગ પુરએતા ભવેહ ॥ ૭.૦૪૧.૦૫

સમધ્વરાયોષસો નમન્ત દધિક્રાવેવ શુચયે પદાય ।
અર્વાચીનં વસુવિદં ભગં નો રથમિવાશ્વા વાજિન આ વહન્તુ ॥ ૭.૦૪૧.૦૬
અશ્વાવતીર્ગોમતીર્ન ઉષાસો વીરવતીઃ સદમુચ્છન્તુ ભદ્રાઃ ।
ઘૃતં દુહાના વિશ્વતઃ પ્રપીતા યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૪૧.૦૭

પ્ર બ્રહ્માણો અઙ્ગિરસો નક્ષન્ત પ્ર ક્રન્દનુર્નભન્યસ્ય વેતુ ।
પ્ર ધેનવ ઉદપ્રુતો નવન્ત યુજ્યાતામદ્રી અધ્વરસ્ય પેશઃ ॥ ૭.૦૪૨.૦૧
સુગસ્તે અગ્ને સનવિત્તો અધ્વા યુક્ષ્વા સુતે હરિતો રોહિતશ્ચ ।
યે વા સદ્મન્નરુષા વીરવાહો હુવે દેવાનાં જનિમાનિ સત્તઃ ॥ ૭.૦૪૨.૦૨
સમુ વો યજ્ઞં મહયન્નમોભિઃ પ્ર હોતા મન્દ્રો રિરિચ ઉપાકે ।
યજસ્વ સુ પુર્વણીક દેવાના યજ્ઞિયામરમતિં વવૃત્યાઃ ॥ ૭.૦૪૨.૦૩
યદા વીરસ્ય રેવતો દુરોણે સ્યોનશીરતિથિરાચિકેતત્ ।
સુપ્રીતો અગ્નિઃ સુધિતો દમ આ સ વિશે દાતિ વાર્યમિયત્યૈ ॥ ૭.૦૪૨.૦૪
ઇમં નો અગ્ને અધ્વરં જુષસ્વ મરુત્સ્વિન્દ્રે યશસં કૃધી નઃ ।
આ નક્તા બર્હિઃ સદતામુષાસોશન્તા મિત્રાવરુણા યજેહ ॥ ૭.૦૪૨.૦૫
એવાગ્નિં સહસ્યં૧ વસિષ્ઠો રાયસ્કામો વિશ્વપ્સ્ન્યસ્ય સ્તૌત્ ।
ઇષં રયિં પપ્રથદ્વાજમસ્મે યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૪૨.૦૬

પ્ર વો યજ્ઞેષુ દેવયન્તો અર્ચન્દ્યાવા નમોભિઃ પૃથિવી ઇષધ્યૈ ।
યેષાં બ્રહ્માણ્યસમાનિ વિપ્રા વિષ્વગ્વિયન્તિ વનિનો ન શાખાઃ ॥ ૭.૦૪૩.૦૧
પ્ર યજ્ઞ એતુ હેત્વો ન સપ્તિરુદ્યચ્છધ્વં સમનસો ઘૃતાચીઃ ।
સ્તૃણીત બર્હિરધ્વરાય સાધૂર્ધ્વા શોચીંષિ દેવયૂન્યસ્થુઃ ॥ ૭.૦૪૩.૦૨
આ પુત્રાસો ન માતરં વિભૃત્રાઃ સાનૌ દેવાસો બર્હિષઃ સદન્તુ ।
આ વિશ્વાચી વિદથ્યામનક્ત્વગ્ને મા નો દેવતાતા મૃધસ્કઃ ॥ ૭.૦૪૩.૦૩
તે સીષપન્ત જોષમા યજત્રા ઋતસ્ય ધારાઃ સુદુઘા દુહાનાઃ ।
જ્યેષ્ઠં વો અદ્ય મહ આ વસૂનામા ગન્તન સમનસો યતિ ષ્ઠ ॥ ૭.૦૪૩.૦૪
એવા નો અગ્ને વિક્ષ્વા દશસ્ય ત્વયા વયં સહસાવન્નાસ્ક્રાઃ ।
રાયા યુજા સધમાદો અરિષ્ટા યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૪૩.૦૫

દધિક્રાં વઃ પ્રથમમશ્વિનોષસમગ્નિં સમિદ્ધં ભગમૂતયે હુવે ।

ઇન્દ્રં વિષ્ણું પૂષણં બ્રહ્મણસ્પતિમાદિત્યાન્દ્યાવાપૃથિવી અપઃ સ્વઃ ॥ ૭.૦૪૪.૦૧
દધિક્રામુ નમસા બોધયન્ત ઉદીરાણા યજ્ઞમુપપ્રયન્તઃ ।
ઇળાં દેવીં બર્હિષિ સાદયન્તોઽશ્વિના વિપ્રા સુહવા હુવેમ ॥ ૭.૦૪૪.૦૨
દધિક્રાવાણં બુબુધાનો અગ્નિમુપ બ્રુવ ઉષસં સૂર્યં ગામ્ ।
બ્રધ્નં માઁશ્ચતોર્વરુણસ્ય બભ્રું તે વિશ્વાસ્મદ્દુરિતા યાવયન્તુ ॥ ૭.૦૪૪.૦૩
દધિક્રાવા પ્રથમો વાજ્યર્વાગ્રે રથાનાં ભવતિ પ્રજાનન્ ।
સંવિદાન ઉષસા સૂર્યેણાદિત્યેભિર્વસુભિરઙ્ગિરોભિઃ ॥ ૭.૦૪૪.૦૪
આ નો દધિક્રાઃ પથ્યામનક્ત્વૃતસ્ય પન્થામન્વેતવા ઉ ।
શૃણોતુ નો દૈવ્યં શર્ધો અગ્નિઃ શૃણ્વન્તુ વિશ્વે મહિષા અમૂરાઃ ॥ ૭.૦૪૪.૦૫

આ દેવો યાતુ સવિતા સુરત્નોઽન્તરિક્ષપ્રા વહમાનો અશ્વૈઃ ।
હસ્તે દધાનો નર્યા પુરૂણિ નિવેશયઞ્ચ પ્રસુવઞ્ચ ભૂમ ॥ ૭.૦૪૫.૦૧
ઉદસ્ય બાહૂ શિથિરા બૃહન્તા હિરણ્યયા દિવો અન્તાઁ અનષ્ટામ્ ।
નૂનં સો અસ્ય મહિમા પનિષ્ટ સૂરશ્ચિદસ્મા અનુ દાદપસ્યામ્ ॥ ૭.૦૪૫.૦૨
સ ઘા નો દેવઃ સવિતા સહાવા સાવિષદ્વસુપતિર્વસૂનિ ।
વિશ્રયમાણો અમતિમુરૂચીં મર્તભોજનમધ રાસતે નઃ ॥ ૭.૦૪૫.૦૩
ઇમા ગિરઃ સવિતારં સુજિહ્વં પૂર્ણગભસ્તિમીળતે સુપાણિમ્ ।
ચિત્રં વયો બૃહદસ્મે દધાતુ યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૪૫.૦૪

ઇમા રુદ્રાય સ્થિરધન્વને ગિરઃ ક્ષિપ્રેષવે દેવાય સ્વધાવ્ને ।
અષાળ્હાય સહમાનાય વેધસે તિગ્માયુધાય ભરતા શૃણોતુ નઃ ॥ ૭.૦૪૬.૦૧
સ હિ ક્ષયેણ ક્ષમ્યસ્ય જન્મનઃ સામ્રાજ્યેન દિવ્યસ્ય ચેતતિ ।
અવન્નવન્તીરુપ નો દુરશ્ચરાનમીવો રુદ્ર જાસુ નો ભવ ॥ ૭.૦૪૬.૦૨
યા તે દિદ્યુદવસૃષ્ટા દિવસ્પરિ ક્ષ્મયા ચરતિ પરિ સા વૃણક્તુ નઃ ।
સહસ્રં તે સ્વપિવાત ભેષજા મા નસ્તોકેષુ તનયેષુ રીરિષઃ ॥ ૭.૦૪૬.૦૩
મા નો વધી રુદ્ર મા પરા દા મા તે ભૂમ પ્રસિતૌ હીળિતસ્ય ।
આ નો ભજ બર્હિષિ જીવશંસે યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૪૬.૦૪

આપો યં વઃ પ્રથમં દેવયન્ત ઇન્દ્રપાનમૂર્મિમકૃણ્વતેળઃ ।
તં વો વયં શુચિમરિપ્રમદ્ય ઘૃતપ્રુષં મધુમન્તં વનેમ ॥ ૭.૦૪૭.૦૧

તમૂર્મિમાપો મધુમત્તમં વોઽપાં નપાદવત્વાશુહેમા ।
યસ્મિન્નિન્દ્રો વસુભિર્માદયાતે તમશ્યામ દેવયન્તો વો અદ્ય ॥ ૭.૦૪૭.૦૨
શતપવિત્રાઃ સ્વધયા મદન્તીર્દેવીર્દેવાનામપિ યન્તિ પાથઃ ।
તા ઇન્દ્રસ્ય ન મિનન્તિ વ્રતાનિ સિન્ધુભ્યો હવ્યં ઘૃતવજ્જુહોત ॥ ૭.૦૪૭.૦૩
યાઃ સૂર્યો રશ્મિભિરાતતાન યાભ્ય ઇન્દ્રો અરદદ્ગાતુમૂર્મિમ્ ।
તે સિન્ધવો વરિવો ધાતના નો યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૪૭.૦૪

ઋભુક્ષણો વાજા માદયધ્વમસ્મે નરો મઘવાનઃ સુતસ્ય ।
આ વોઽર્વાચઃ ક્રતવો ન યાતાં વિભ્વો રથં નર્યં વર્તયન્તુ ॥ ૭.૦૪૮.૦૧
ઋભુરૃભુભિરભિ વઃ સ્યામ વિભ્વો વિભુભિઃ શવસા શવાંસિ ।
વાજો અસ્માઁ અવતુ વાજસાતાવિન્દ્રેણ યુજા તરુષેમ વૃત્રમ્ ॥ ૭.૦૪૮.૦૨
તે ચિદ્ધિ પૂર્વીરભિ સન્તિ શાસા વિશ્વાઁ અર્ય ઉપરતાતિ વન્વન્ ।
ઇન્દ્રો વિભ્વાઁ ઋભુક્ષા વાજો અર્યઃ શત્રોર્મિથત્યા કૃણવન્વિ નૃમ્ણમ્ ॥ ૭.૦૪૮.૦૩
નૂ દેવાસો વરિવઃ કર્તના નો ભૂત નો વિશ્વેઽવસે સજોષાઃ ।
સમસ્મે ઇષં વસવો દદીરન્યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૪૮.૦૪

સમુદ્રજ્યેષ્ઠાઃ સલિલસ્ય મધ્યાત્પુનાના યન્ત્યનિવિશમાનાઃ ।
ઇન્દ્રો યા વજ્રી વૃષભો રરાદ તા આપો દેવીરિહ મામવન્તુ ॥ ૭.૦૪૯.૦૧
યા આપો દિવ્યા ઉત વા સ્રવન્તિ ખનિત્રિમા ઉત વા યાઃ સ્વયંજાઃ ।
સમુદ્રાર્થા યાઃ શુચયઃ પાવકાસ્તા આપો દેવીરિહ મામવન્તુ ॥ ૭.૦૪૯.૦૨
યાસાં રાજા વરુણો યાતિ મધ્યે સત્યાનૃતે અવપશ્યઞ્જનાનામ્ ।
મધુશ્ચુતઃ શુચયો યાઃ પાવકાસ્તા આપો દેવીરિહ મામવન્તુ ॥ ૭.૦૪૯.૦૩
યાસુ રાજા વરુણો યાસુ સોમો વિશ્વે દેવા યાસૂર્જં મદન્તિ ।
વૈશ્વાનરો યાસ્વગ્નિઃ પ્રવિષ્ટસ્તા આપો દેવીરિહ મામવન્તુ ॥ ૭.૦૪૯.૦૪

આ માં મિત્રાવરુણેહ રક્ષતં કુલાયયદ્વિશ્વયન્મા ન આ ગન્ ।
અજકાવં દુર્દૃશીકં તિરો દધે મા માં પદ્યેન રપસા વિદત્ત્સરુઃ ॥ ૭.૦૫૦.૦૧
યદ્વિજામન્પરુષિ વન્દનં ભુવદષ્ઠીવન્તૌ પરિ કુલ્ફૌ ચ દેહત્ ।
અગ્નિષ્ટચ્છોચન્નપ બાધતામિતો મા માં પદ્યેન રપસા વિદત્ત્સરુઃ ॥ ૭.૦૫૦.૦૨
યચ્છલ્મલૌ ભવતિ યન્નદીષુ યદોષધીભ્યઃ પરિ જાયતે વિષમ્ ।

વિશ્વે દેવા નિરિતસ્તત્સુવન્તુ મા માં પદ્યેન રપસા વિદત્ત્સરુઃ ॥ ૭.૦૫૦.૦૩

યાઃ પ્રવતો નિવત ઉદ્વત ઉદન્વતીરનુદકાશ્ચ યાઃ ।
તા અસ્મભ્યં પયસા પિન્વમાનાઃ શિવા દેવીરશિપદા ભવન્તુ સર્વા નદ્યો અશિમિદા ભવન્તુ ॥ ૭.૦૫૦.૦૪

આદિત્યાનામવસા નૂતનેન સક્ષીમહિ શર્મણા શંતમેન ।
અનાગાસ્ત્વે અદિતિત્વે તુરાસ ઇમં યજ્ઞં દધતુ શ્રોષમાણાઃ ॥ ૭.૦૫૧.૦૧

આદિત્યાસો અદિતિર્માદયન્તાં મિત્રો અર્યમા વરુણો રજિષ્ઠાઃ ।
અસ્માકં સન્તુ ભુવનસ્ય ગોપાઃ પિબન્તુ સોમમવસે નો અદ્ય ॥ ૭.૦૫૧.૦૨

આદિત્યા વિશ્વે મરુતશ્ચ વિશ્વે દેવાશ્ચ વિશ્વ ઋભવશ્ચ વિશ્વે ।
ઇન્દ્રો અગ્નિરશ્વિના તુષ્ટુવાના યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૫૧.૦૩

આદિત્યાસો અદિતયઃ સ્યામ પૂર્દેવત્રા વસવો મર્ત્યત્રા ।
સનેમ મિત્રાવરુણા સનન્તો ભવેમ દ્યાવાપૃથિવી ભવન્તઃ ॥ ૭.૦૫૨.૦૧

મિત્રસ્તન્નો વરુણો મામહન્ત શર્મ તોકાય તનયાય ગોપાઃ ।
મા વો ભુજેમાન્યજાતમેનો મા તત્કર્મ વસવો યચ્ચયધ્વે ॥ ૭.૦૫૨.૦૨

તુરણ્યવોઽઙ્ગિરસો નક્ષન્ત રત્નં દેવસ્ય સવિતુરિયાનાઃ ।
પિતા ચ તન્નો મહાન્યજત્રો વિશ્વે દેવાઃ સમનસો જુષન્ત ॥ ૭.૦૫૨.૦૩

પ્ર દ્યાવા યજ્ઞૈઃ પૃથિવી નમોભિઃ સબાધ ઈળે બૃહતી યજત્રે ।
તે ચિદ્ધિ પૂર્વે કવયો ગૃણન્તઃ પુરો મહી દધિરે દેવપુત્રે ॥ ૭.૦૫૩.૦૧

પ્ર પૂર્વજે પિતરા નવ્યસીભિર્ગીર્ભિઃ કૃણુધ્વં સદને ઋતસ્ય ।
આ નો દ્યાવાપૃથિવી દૈવ્યેન જનેન યાતં મહિ વાં વરૂથમ્ ॥ ૭.૦૫૩.૦૨

ઉતો હિ વાં રત્નધેયાનિ સન્તિ પુરૂણિ દ્યાવાપૃથિવી સુદાસે ।
અસ્મે ધત્તં યદસદસ્કૃધોયુ યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૫૩.૦૩

વાસ્તોષ્પતે પ્રતિ જાનીહ્યસ્માન્સ્વાવેશો અનમીવો ભવા નઃ ।
યત્ત્વેમહે પ્રતિ તન્નો જુષસ્વ શં નો ભવ દ્વિપદે શં ચતુષ્પદે ॥ ૭.૦૫૪.૦૧

વાસ્તોષ્પતે પ્રતરણો ન એધિ ગયસ્ફાનો ગોભિરશ્વેભિરિન્દો ।
અજરાસસ્તે સખ્યે સ્યામ પિતેવ પુત્રાન્પ્રતિ નો જુષસ્વ ॥ ૭.૦૫૪.૦૨

વાસ્તોષ્પતે શગ્મયા સંસદા તે સક્ષીમહિ રણ્વયા ગાતુમત્યા ।
પાહિ ક્ષેમ ઉત યોગે વરં નો યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૫૪.૦૩

અમીવહા વાસ્તોષ્પતે વિશ્વા રૂપાણ્યાવિશન્ ।
સખા સુશેવ એધિ નઃ ॥ ૭.૦૫૫.૦૧
યદર્જુન સારમેય દતઃ પિશઙ્ગ યચ્છસે ।
વીવ ભ્રાજન્ત ઋષ્ટય ઉપ સ્રક્વેષુ બપ્સતો નિ ષુ સ્વપ ॥ ૭.૦૫૫.૦૨
સ્તેનં રાય સારમેય તસ્કરં વા પુનઃસર ।
સ્તોતૄનિન્દ્રસ્ય રાયસિ કિમસ્માન્દુચ્છુનાયસે નિ ષુ સ્વપ ॥ ૭.૦૫૫.૦૩
ત્વં સૂકરસ્ય દર્દૃહિ તવ દર્દર્તુ સૂકરઃ ।
સ્તોતૄનિન્દ્રસ્ય રાયસિ કિમસ્માન્દુચ્છુનાયસે નિ ષુ સ્વપ ॥ ૭.૦૫૫.૦૪
સસ્તુ માતા સસ્તુ પિતા સસ્તુ શ્વા સસ્તુ વિશ્પતિઃ ।
સસન્તુ સર્વે જ્ઞાતયઃ સસ્ત્વયમભિતો જનઃ ॥ ૭.૦૫૫.૦૫
ય આસ્તે યશ્ચ ચરતિ યશ્ચ પશ્યતિ નો જનઃ ।
તેષાં સં હન્મો અક્ષાણિ યથેદં હર્મ્યં તથા ॥ ૭.૦૫૫.૦૬
સહસ્રશૃઙ્ગો વૃષભો યઃ સમુદ્રાદુદાચરત્ ।
તેના સહસ્યેના વયં નિ જનાન્સ્વાપયામસિ ॥ ૭.૦૫૫.૦૭
પ્રોષ્ઠેશયા વહ્યેશયા નારીર્યાસ્તલ્પશીવરીઃ ।
સ્ત્રિયો યાઃ પુણ્યગન્ધાસ્તાઃ સર્વાઃ સ્વાપયામસિ ॥ ૭.૦૫૫.૦૮

ક ઈં વ્યક્તા નરઃ સનીળા રુદ્રસ્ય મર્યા અધ સ્વશ્વાઃ ॥ ૭.૦૫૬.૦૧
નકિર્હ્યેષાં જનૂંષિ વેદ તે અઙ્ગ વિદ્રે મિથો જનિત્રમ્ ॥ ૭.૦૫૬.૦૨
અભિ સ્વપૂભિર્મિથો વપન્ત વાતસ્વનસઃ શ્યેના અસ્પૃધ્રન્ ॥ ૭.૦૫૬.૦૩
એતાનિ ધીરો નિણ્યા ચિકેત પૃશ્નિર્યદૂધો મહી જભાર ॥ ૭.૦૫૬.૦૪
સા વિટ્ સુવીરા મરુદ્ભિરસ્તુ સનાત્સહન્તી પુષ્યન્તી નૃમ્ણમ્ ॥ ૭.૦૫૬.૦૫
યામં યેષ્ઠાઃ શુભા શોભિષ્ઠાઃ શ્રિયા સમ્મિશ્લા ઓજોભિરુગ્રાઃ ॥ ૭.૦૫૬.૦૬
ઉગ્રં વ ઓજઃ સ્થિરા શવાંસ્યધા મરુદ્ભિર્ગણસ્તુવિષ્માન્ ॥ ૭.૦૫૬.૦૭
શુભ્રો વઃ શુષ્મઃ ક્રુધ્મી મનાંસિ ધુનિર્મુનિરિવ શર્ધસ્ય ધૃષ્ણોઃ ॥ ૭.૦૫૬.૦૮
સનેમ્યસ્મદ્યુયોત દિદ્યું મા વો દુર્મતિરિહ પ્રણઙ્નઃ ॥ ૭.૦૫૬.૦૯
પ્રિયા વો નામ હુવે તુરાણામા યત્તૃપન્મરુતો વાવશાનાઃ ॥ ૭.૦૫૬.૧૦
સ્વાયુધાસ ઇષ્મિણઃ સુનિષ્કા ઉત સ્વયં તન્વ૧ઃ શુમ્ભમાનાઃ ॥ ૭.૦૫૬.૧૧

શુચી વો હવ્યા મરુતઃ શુચીનાં શુચિં હિનોમ્યધ્વરં શુચિભ્યઃ ।
ઋતેન સત્યમૃતસાપ આયઞ્છુચિજન્માનઃ શુચયઃ પાવકાઃ ॥ ૭.૦૫૬.૧૨
અંસેષ્વા મરુતઃ ખાદયો વો વક્ષસ્સુ રુક્મા ઉપશિશ્રિયાણાઃ ।
વિ વિદ્યુતો ન વૃષ્ટિભી રુચાના અનુ સ્વધામાયુધૈર્યચ્છમાનાઃ ॥ ૭.૦૫૬.૧૩
પ્ર બુધ્ન્યા વ ઈરતે મહાંસિ પ્ર નામાનિ પ્રયજ્યવસ્તિરધ્વમ્ ।
સહસ્રિયં દમ્યં ભાગમેતં ગૃહમેધીયં મરુતો જુષધ્વમ્ ॥ ૭.૦૫૬.૧૪
યદિ સ્તુતસ્ય મરુતો અધીથેત્થા વિપ્રસ્ય વાજિનો હવીમન્ ।
મક્ષૂ રાયઃ સુવીર્યસ્ય દાત નૂ ચિદ્યમન્ય આદભદરાવા ॥ ૭.૦૫૬.૧૫
અત્યાસો ન યે મરુતઃ સ્વઞ્ચો યક્ષદૃશો ન શુભયન્ત મર્યાઃ ।
તે હર્મ્યેષ્ઠાઃ શિશવો ન શુભ્રા વત્સાસો ન પ્રક્રીળિનઃ પયોધાઃ ॥ ૭.૦૫૬.૧૬
દશસ્યન્તો નો મરુતો મૃળન્તુ વરિવસ્યન્તો રોદસી સુમેકે ।
આરે ગોહા નૃહા વધો વો અસ્તુ સુમ્નેભિરસ્મે વસવો નમધ્વમ્ ॥ ૭.૦૫૬.૧૭
આ વો હોતા જોહવીતિ સત્તઃ સત્રાચીં રાતિં મરુતો ગૃણાનઃ ।
ય ઈવતો વૃષણો અસ્તિ ગોપાઃ સો અદ્વયાવી હવતે વ ઉક્થૈઃ ॥ ૭.૦૫૬.૧૮
ઇમે તુરં મરુતો રામયન્તીમે સહઃ સહસ આ નમન્તિ ।
ઇમે શંસં વનુષ્યતો નિ પાન્તિ ગુરુ દ્વેષો અરરુષે દધન્તિ ॥ ૭.૦૫૬.૧૯
ઇમે રધ્રં ચિન્મરુતો જુનન્તિ ભૃમિં ચિદ્યથા વસવો જુષન્ત ।
અપ બાધધ્વં વૃષણસ્તમાંસિ ધત્ત વિશ્વં તનયં તોકમસ્મે ॥ ૭.૦૫૬.૨૦
મા વો દાત્રાન્મરુતો નિરરામ મા પશ્ચાદ્દઘ્મ રથ્યો વિભાગે ।
આ નઃ સ્પાર્હે ભજતના વસવ્યે૩ યદીં સુજાતં વૃષણો વો અસ્તિ ॥ ૭.૦૫૬.૨૧
સં યદ્ધનન્ત મન્યુભિર્જનાસઃ શૂરા યહ્વીષ્વોષધીષુ વિક્ષુ ।
અધ સ્મા નો મરુતો રુદ્રિયાસસ્ત્રાતારો ભૂત પૃતનાસ્વર્યઃ ॥ ૭.૦૫૬.૨૨
ભૂરિ ચક્ર મરુતઃ પિત્ર્યાણ્યુક્થાનિ યા વઃ શસ્યન્તે પુરા ચિત્ ।
મરુદ્ભિરુગ્રઃ પૃતનાસુ સાળ્હા મરુદ્ભિરિત્સનિતા વાજમર્વા ॥ ૭.૦૫૬.૨૩
અસ્મે વીરો મરુતઃ શુષ્મ્યસ્તુ જનાનાં યો અસુરો વિધર્તા ।
અપો યેન સુક્ષિતયે તરેમાધ સ્વમોકો અભિ વઃ સ્યામ ॥ ૭.૦૫૬.૨૪
તન્ન ઇન્દ્રો વરુણો મિત્રો અગ્નિરાપ ઓષધીર્વનિનો જુષન્ત ।

શર્મન્સ્યામ મરુતામુપસ્થે યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૫૬.૨૫

મધ્વો વો નામ મારુતં યજત્રાઃ પ્ર યજ્ઞેષુ શવસા મદન્તિ ।
યે રેજયન્તિ રોદસી ચિદુર્વી પિન્વન્ત્યુત્સં યદયાસુરુગ્રાઃ ॥ ૭.૦૫૭.૦૧
નિચેતારો હિ મરુતો ગૃણન્તં પ્રણેતારો યજમાનસ્ય મન્મ ।
અસ્માકમદ્ય વિદથેષુ બર્હિરા વીતયે સદત પિપ્રિયાણાઃ ॥ ૭.૦૫૭.૦૨
નૈતાવદન્યે મરુતો યથેમે ભ્રાજન્તે રુક્મૈરાયુધૈસ્તનૂભિઃ ।
આ રોદસી વિશ્વપિશઃ પિશાનાઃ સમાનમઞ્જ્યઞ્જતે શુભે કમ્ ॥ ૭.૦૫૭.૦૩
ઋધક્સા વો મરુતો દિદ્યુદસ્તુ યદ્વ આગઃ પુરુષતા કરામ ।
મા વસ્તસ્યામપિ ભૂમા યજત્રા અસ્મે વો અસ્તુ સુમતિશ્ચનિષ્ઠા ॥ ૭.૦૫૭.૦૪
કૃતે ચિદત્ર મરુતો રણન્તાનવદ્યાસઃ શુચયઃ પાવકાઃ ।
પ્ર ણોઽવત સુમતિભિર્યજત્રાઃ પ્ર વાજેભિસ્તિરત પુષ્યસે નઃ ॥ ૭.૦૫૭.૦૫
ઉત સ્તુતાસો મરુતો વ્યન્તુ વિશ્વેભિર્નામભિર્નરો હવીંષિ ।
દદાત નો અમૃતસ્ય પ્રજાયૈ જિગૃત રાયઃ સૂનૃતા મઘાનિ ॥ ૭.૦૫૭.૦૬
આ સ્તુતાસો મરુતો વિશ્વ ઊતી અચ્છા સૂરીન્સર્વતાતા જિગાત ।
યે નસ્ત્મના શતિનો વર્ધયન્તિ યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૫૭.૦૭

પ્ર સાકમુક્ષે અર્ચતા ગણાય યો દૈવ્યસ્ય ધામ્નસ્તુવિષ્માન્ ।
ઉત ક્ષોદન્તિ રોદસી મહિત્વા નક્ષન્તે નાકં નિરૃતેરવંશાત્ ॥ ૭.૦૫૮.૦૧
જનૂશ્ચિદ્વો મરુતસ્ત્વેષ્યેણ ભીમાસસ્તુવિમન્યવોઽયાસઃ ।
પ્ર યે મહોભિરોજસોત સન્તિ વિશ્વો વો યામન્ભયતે સ્વર્દૃક્ ॥ ૭.૦૫૮.૦૨
બૃહદ્વયો મઘવદ્ભ્યો દધાત જુજોષન્નિન્મરુતઃ સુષ્ટુતિં નઃ ।
ગતો નાધ્વા વિ તિરાતિ જન્તું પ્ર ણઃ સ્પાર્હાભિરૂતિભિસ્તિરેત ॥ ૭.૦૫૮.૦૩
યુષ્મોતો વિપ્રો મરુતઃ શતસ્વી યુષ્મોતો અર્વા સહુરિઃ સહસ્રી ।
યુષ્મોતઃ સમ્રાળુત હન્તિ વૃત્રં પ્ર તદ્વો અસ્તુ ધૂતયો દેષ્ણમ્ ॥ ૭.૦૫૮.૦૪
તાઁ આ રુદ્રસ્ય મીળ્હુષો વિવાસે કુવિન્નંસન્તે મરુતઃ પુનર્નઃ ।
યત્સસ્વર્તા જિહીળિરે યદાવિરવ તદેન ઈમહે તુરાણામ્ ॥ ૭.૦૫૮.૦૫
પ્ર સા વાચિ સુષ્ટુતિર્મઘોનામિદં સૂક્તં મરુતો જુષન્ત ।
આરાચ્ચિદ્દ્વેષો વૃષણો યુયોત યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૫૮.૦૬

યં ત્રાયધ્વ ઇદમિદં દેવાસો યં ચ નયથ ।
તસ્મા અગ્ને વરુણ મિત્રાર્યમન્મરુતઃ શર્મ યચ્છત ॥ ૭.૦૫૯.૦૧
યુષ્માકં દેવા અવસાહનિ પ્રિય ઈજાનસ્તરતિ દ્વિષઃ ।
પ્ર સ ક્ષયં તિરતે વિ મહીરિષો યો વો વરાય દાશતિ ॥ ૭.૦૫૯.૦૨
નહિ વશ્ચરમં ચન વસિષ્ઠઃ પરિમંસતે ।
અસ્માકમદ્ય મરુતઃ સુતે સચા વિશ્વે પિબત કામિનઃ ॥ ૭.૦૫૯.૦૩
નહિ વ ઊતિઃ પૃતનાસુ મર્ધતિ યસ્મા અરાધ્વં નરઃ ।
અભિ વ આવર્ત્સુમતિર્નવીયસી તૂયં યાત પિપીષવઃ ॥ ૭.૦૫૯.૦૪
ઓ ષુ ઘૃષ્વિરાધસો યાતનાન્ધાંસિ પીતયે ।
ઇમા વો હવ્યા મરુતો રરે હિ કં મો ષ્વ૧ન્યત્ર ગન્તન ॥ ૭.૦૫૯.૦૫
આ ચ નો બર્હિઃ સદતાવિતા ચ નઃ સ્પાર્હાણિ દાતવે વસુ ।
અસ્રેધન્તો મરુતઃ સોમ્યે મધૌ સ્વાહેહ માદયાધ્વૈ ॥ ૭.૦૫૯.૦૬
સસ્વશ્ચિદ્ધિ તન્વ૧ઃ શુમ્ભમાના આ હંસાસો નીલપૃષ્ઠા અપપ્તન્ ।
વિશ્વં શર્ધો અભિતો મા નિ ષેદ નરો ન રણ્વાઃ સવને મદન્તઃ ॥ ૭.૦૫૯.૦૭
યો નો મરુતો અભિ દુર્હૃણાયુસ્તિરશ્ચિત્તાનિ વસવો જિઘાંસતિ ।
દ્રુહઃ પાશાન્પ્રતિ સ મુચીષ્ટ તપિષ્ઠેન હન્મના હન્તના તમ્ ॥ ૭.૦૫૯.૦૮
સાંતપના ઇદં હવિર્મરુતસ્તજ્જુજુષ્ટન ।
યુષ્માકોતી રિશાદસઃ ॥ ૭.૦૫૯.૦૯
ગૃહમેધાસ આ ગત મરુતો માપ ભૂતન ।
યુષ્માકોતી સુદાનવઃ ॥ ૭.૦૫૯.૧૦
ઇહેહ વઃ સ્વતવસઃ કવયઃ સૂર્યત્વચઃ ।
યજ્ઞં મરુત આ વૃણે ॥ ૭.૦૫૯.૧૧
ત્ર્યમ્બકં યજામહે સુગન્ધિં પુષ્ટિવર્ધનમ્ ।
ઉર્વારુકમિવ બન્ધનાન્મૃત્યોર્મુક્ષીય મામૃતાત્ ॥ ૭.૦૫૯.૧૨

યદદ્ય સૂર્ય બ્રવોઽનાગા ઉદ્યન્મિત્રાય વરુણાય સત્યમ્ ।
વયં દેવત્રાદિતે સ્યામ તવ પ્રિયાસો અર્યમન્ગૃણન્તઃ ॥ ૭.૦૬૦.૦૧
એષ સ્ય મિત્રાવરુણા નૃચક્ષા ઉભે ઉદેતિ સૂર્યો અભિ જ્મન્ ।

વિશ્વસ્ય સ્થાતુર્જગતશ્ચ ગોપા ઋજુ મર્તેષુ વૃજિના ચ પશ્યન્ ॥ ૭.૦૬૦.૦૨
અયુક્ત સપ્ત હરિતઃ સધસ્થાદ્યા ઈં વહન્તિ સૂર્યં ઘૃતાચીઃ ।
ધામાનિ મિત્રાવરુણા યુવાકુઃ સં યો યૂથેવ જનિમાનિ ચષ્ટે ॥ ૭.૦૬૦.૦૩
ઉદ્વાં પૃક્ષાસો મધુમન્તો અસ્થુરા સૂર્યો અરુહચ્છુક્રમર્ણઃ ।
યસ્મા આદિત્યા અધ્વનો રદન્તિ મિત્રો અર્યમા વરુણઃ સજોષાઃ ॥ ૭.૦૬૦.૦૪
ઇમે ચેતારો અનૃતસ્ય ભૂરેર્મિત્રો અર્યમા વરુણો હિ સન્તિ ।
ઇમ ઋતસ્ય વાવૃધુર્દુરોણે શગ્માસઃ પુત્રા અદિતેરદબ્ધાઃ ॥ ૭.૦૬૦.૦૫
ઇમે મિત્રો વરુણો દૂળભાસોઽચેતસં ચિચ્ચિતયન્તિ દક્ષૈઃ ।
અપિ ક્રતું સુચેતસં વતન્તસ્તિરશ્ચિદંહઃ સુપથા નયન્તિ ॥ ૭.૦૬૦.૦૬
ઇમે દિવો અનિમિષા પૃથિવ્યાશ્ચિકિત્વાંસો અચેતસં નયન્તિ ।
પ્રવ્રાજે ચિન્નદ્યો ગાધમસ્તિ પારં નો અસ્ય વિષ્પિતસ્ય પર્ષન્ ॥ ૭.૦૬૦.૦૭
યદ્ગોપાવદદિતિઃ શર્મ ભદ્રં મિત્રો યચ્છન્તિ વરુણઃ સુદાસે ।
તસ્મિન્ના તોકં તનયં દધાના મા કર્મ દેવહેળનં તુરાસઃ ॥ ૭.૦૬૦.૦૮
અવ વેદિં હોત્રાભિર્યજેત રિપઃ કાશ્ચિદ્વરુણધ્રુતઃ સઃ ।
પરિ દ્વેષોભિરર્યમા વૃણક્તૂરું સુદાસે વૃષણા ઉ લોકમ્ ॥ ૭.૦૬૦.૦૯
સસ્વશ્ચિદ્ધિ સમૃતિસ્ત્વેષ્યેષામપીચ્યેન સહસા સહન્તે ।
યુષ્મદ્ભિયા વૃષણો રેજમાના દક્ષસ્ય ચિન્મહિના મૃળતા નઃ ॥ ૭.૦૬૦.૧૦
યો બ્રહ્મણે સુમતિમાયજાતે વાજસ્ય સાતૌ પરમસ્ય રાયઃ ।
સીક્ષન્ત મન્યું મઘવાનો અર્ય ઉરુ ક્ષયાય ચક્રિરે સુધાતુ ॥ ૭.૦૬૦.૧૧
ઇયં દેવ પુરોહિતિર્યુવભ્યાં યજ્ઞેષુ મિત્રાવરુણાવકારિ ।
વિશ્વાનિ દુર્ગા પિપૃતં તિરો નો યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૬૦.૧૨
ઉદ્વાં ચક્ષુર્વરુણ સુપ્રતીકં દેવયોરેતિ સૂર્યસ્તતન્વાન્ ।
અભિ યો વિશ્વા ભુવનાનિ ચષ્ટે સ મન્યું મર્ત્યેષ્વા ચિકેત ॥ ૭.૦૬૧.૦૧
પ્ર વાં સ મિત્રાવરુણાવૃતાવા વિપ્રો મન્માનિ દીર્ઘશ્રુદિયર્તિ ।
યસ્ય બ્રહ્માણિ સુક્રતૂ અવાથ આ યત્ક્રત્વા ન શરદઃ પૃણૈથે ॥ ૭.૦૬૧.૦૨
પ્રોરોર્મિત્રાવરુણા પૃથિવ્યાઃ પ્ર દિવ ઋષ્વાદ્બૃહતઃ સુદાનૂ ।
સ્પશો દધાથે ઓષધીષુ વિક્ષ્વૃધગ્યતો અનિમિષં રક્ષમાણા ॥ ૭.૦૬૧.૦૩

શંસા મિત્રસ્ય વરુણસ્ય ધામ શુષ્મો રોદસી બદ્બધે મહિત્વા ।
અયન્માસા અયજ્વનામવીરાઃ પ્ર યજ્ઞમન્મા વૃજનં તિરાતે ॥ ૭.૦૬૧.૦૪
અમૂરા વિશ્વા વૃષણાવિમા વાં ન યાસુ ચિત્રં દદૃશે ન યક્ષમ્ ।
દ્રુહઃ સચન્તે અનૃતા જનાનાં ન વાં નિણ્યાન્યચિતે અભૂવન્ ॥ ૭.૦૬૧.૦૫
સમુ વાં યજ્ઞં મહયં નમોભિર્હુવે વાં મિત્રાવરુણા સબાધઃ ।
પ્ર વાં મન્માન્યૃચસે નવાનિ કૃતાનિ બ્રહ્મ જુજુષન્નિમાનિ ॥ ૭.૦૬૧.૦૬
ઇયં દેવ પુરોહિતિર્યુવભ્યાં યજ્ઞેષુ મિત્રાવરુણાવકારિ ।
વિશ્વાનિ દુર્ગા પિપૃતં તિરો નો યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૬૧.૦૭

ઉત્સૂર્યો બૃહદર્ચીંષ્યશ્રેત્પુરુ વિશ્વા જનિમ માનુષાણામ્ ।
સમો દિવા દદૃશે રોચમાનઃ ક્રત્વા કૃતઃ સુકૃતઃ કર્તૃભિર્ભૂત્ ॥ ૭.૦૬૨.૦૧
સ સૂર્ય પ્રતિ પુરો ન ઉદ્ગા એભિઃ સ્તોમેભિરેતશેભિરેવૈઃ ।
પ્ર નો મિત્રાય વરુણાય વોચોઽનાગસો અર્યમ્ણે અગ્નયે ચ ॥ ૭.૦૬૨.૦૨
વિ નઃ સહસ્રં શુરુધો રદન્ત્વૃતાવાનો વરુણો મિત્રો અગ્નિઃ ।
યચ્છન્તુ ચન્દ્રા ઉપમં નો અર્કમા નઃ કામં પૂપુરન્તુ સ્તવાનાઃ ॥ ૭.૦૬૨.૦૩
દ્યાવાભૂમી અદિતે ત્રાસીથાં નો યે વાં જજ્ઞુઃ સુજનિમાન ઋષ્વે ।
મા હેળે ભૂમ વરુણસ્ય વાયોર્મા મિત્રસ્ય પ્રિયતમસ્ય નૃણામ્ ॥ ૭.૦૬૨.૦૪
પ્ર બાહવા સિસૃતં જીવસે ન આ નો ગવ્યૂતિમુક્ષતં ઘૃતેન ।
આ નો જને શ્રવયતં યુવાના શ્રુતં મે મિત્રાવરુણા હવેમા ॥ ૭.૦૬૨.૦૫
નૂ મિત્રો વરુણો અર્યમા નસ્ત્મને તોકાય વરિવો દધન્તુ ।
સુગા નો વિશ્વા સુપથાનિ સન્તુ યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૬૨.૦૬

ઉદ્વેતિ સુભગો વિશ્વચક્ષાઃ સાધારણઃ સૂર્યો માનુષાણામ્ ।
ચક્ષુર્મિત્રસ્ય વરુણસ્ય દેવશ્ચર્મેવ યઃ સમવિવ્યક્તમાંસિ ॥ ૭.૦૬૩.૦૧
ઉદ્વેતિ પ્રસવીતા જનાનાં મહાન્કેતુરર્ણવઃ સૂર્યસ્ય ।
સમાનં ચક્રં પર્યાવિવૃત્સન્યદેતશો વહતિ ધૂર્ષુ યુક્તઃ ॥ ૭.૦૬૩.૦૨
વિભ્રાજમાન ઉષસામુપસ્થાદ્રેભૈરુદેત્યનુમદ્યમાનઃ ।
એષ મે દેવઃ સવિતા ચચ્છન્દ યઃ સમાનં ન પ્રમિનાતિ ધામ ॥ ૭.૦૬૩.૦૩
દિવો રુક્મ ઉરુચક્ષા ઉદેતિ દૂરેઅર્થસ્તરણિર્ભ્રાજમાનઃ ।

નૂનં જનાઃ સૂર્યેણ પ્રસૂતા અયન્નર્થાનિ કૃણવન્નપાંસિ ॥ ૭.૦૬૩.૦૪

યત્રા ચક્રુરમૃતા ગાતુમસ્મૈ શ્યેનો ન દીયન્નન્વેતિ પાથઃ ।
પ્રતિ વાં સૂર ઉદિતે વિધેમ નમોભિર્મિત્રાવરુણોત હવ્યૈઃ ॥ ૭.૦૬૩.૦૫

નૂ મિત્રો વરુણો અર્યમા નસ્ત્મને તોકાય વરિવો દધન્તુ ।
સુગા નો વિશ્વા સુપથાનિ સન્તુ યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૬૩.૦૬

દિવિ ક્ષયન્તા રજસઃ પૃથિવ્યાં પ્ર વાં ઘૃતસ્ય નિર્ણિજો દદીરન્ ।
હવ્યં નો મિત્રો અર્યમા સુજાતો રાજા સુક્ષત્રો વરુણો જુષન્ત ॥ ૭.૦૬૪.૦૧

આ રાજાના મહ ઋતસ્ય ગોપા સિન્ધુપતી ક્ષત્રિયા યાતમર્વાક્ ।
ઇળાં નો મિત્રાવરુણોત વૃષ્ટિમવ દિવ ઇન્વતં જીરદાનૂ ॥ ૭.૦૬૪.૦૨

મિત્રસ્તન્નો વરુણો દેવો અર્યઃ પ્ર સાધિષ્ઠેભિઃ પથિભિર્નયન્તુ ।
બ્રવદ્યથા ન આદરિઃ સુદાસ ઇષા મદેમ સહ દેવગોપાઃ ॥ ૭.૦૬૪.૦૩

યો વાં ગર્તં મનસા તક્ષદેતમૂર્ધ્વાં ધીતિં કૃણવદ્ધારયચ્ચ ।
ઉક્ષેથાં મિત્રાવરુણા ઘૃતેન તા રાજાના સુક્ષિતીસ્તર્પયેથામ્ ॥ ૭.૦૬૪.૦૪

એષ સ્તોમો વરુણ મિત્ર તુભ્યં સોમઃ શુક્રો ન વાયવેઽયામિ ।
અવિષ્ટં ધિયો જિગૃતં પુરંધીર્યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૬૪.૦૫

પ્રતિ વાં સૂર ઉદિતે સૂક્તૈર્મિત્રં હુવે વરુણં પૂતદક્ષમ્ ।
યયોરસુર્ય૧મક્ષિતં જ્યેષ્ઠં વિશ્વસ્ય યામન્નાચિતા જિગત્નુ ॥ ૭.૦૬૫.૦૧

તા હિ દેવાનામસુરા તાવર્યા તા નઃ ક્ષિતીઃ કરતમૂર્જયન્તીઃ ।
અશ્યામ મિત્રાવરુણા વયં વાં દ્યાવા ચ યત્ર પીપયન્નહા ચ ॥ ૭.૦૬૫.૦૨

તા ભૂરિપાશાવનૃતસ્ય સેતૂ દુરત્યેતૂ રિપવે મર્ત્યાય ।
ઋતસ્ય મિત્રાવરુણા પથા વામપો ન નાવા દુરિતા તરેમ ॥ ૭.૦૬૫.૦૩

આ નો મિત્રાવરુણા હવ્યજુષ્ટિં ઘૃતૈર્ગવ્યૂતિમુક્ષતમિળાભિઃ ।
પ્રતિ વામત્ર વરમા જનાય પૃણીતમુદ્નો દિવ્યસ્ય ચારોઃ ॥ ૭.૦૬૫.૦૪

એષ સ્તોમો વરુણ મિત્ર તુભ્યં સોમઃ શુક્રો ન વાયવેઽયામિ ।
અવિષ્ટં ધિયો જિગૃતં પુરંધીર્યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૬૫.૦૫

પ્ર મિત્રયોર્વરુણયોઃ સ્તોમો ન એતુ શૂષ્યઃ ।
નમસ્વાન્તુવિજાતયોઃ ॥ ૭.૦૬૬.૦૧

યા ધારયન્ત દેવાઃ સુદક્ષા દક્ષપિતરા ।
અસુર્યાય પ્રમહસા ॥ ૭.૦૬૬.૦૨
તા નઃ સ્તિપા તનૂપા વરુણ જરિતૃણામ્ ।
મિત્ર સાધયતં ધિયઃ ॥ ૭.૦૬૬.૦૩
યદદ્ય સૂર ઉદિતેઽનાગા મિત્રો અર્યમા ।
સુવાતિ સવિતા ભગઃ ॥ ૭.૦૬૬.૦૪
સુપ્રાવીરસ્તુ સ ક્ષયઃ પ્ર નુ યામન્સુદાનવઃ ।
યે નો અંહોઽતિપિપ્રતિ ॥ ૭.૦૬૬.૦૫
ઉત સ્વરાજો અદિતિરદબ્ધસ્ય વ્રતસ્ય યે ।
મહો રાજાન ઈશતે ॥ ૭.૦૬૬.૦૬
પ્રતિ વાં સૂર ઉદિતે મિત્રં ગૃણીષે વરુણમ્ ।
અર્યમણં રિશાદસમ્ ॥ ૭.૦૬૬.૦૭
રાયા હિરણ્યયા મતિરિયમવૃકાય શવસે ।
ઇયં વિપ્રા મેધસાતયે ॥ ૭.૦૬૬.૦૮
તે સ્યામ દેવ વરુણ તે મિત્ર સૂરિભિઃ સહ ।
ઇષં સ્વશ્ચ ધીમહિ ॥ ૭.૦૬૬.૦૯
બહવઃ સૂરચક્ષસોઽગ્નિજિહ્વા ઋતાવૃધઃ ।
ત્રીણિ યે યેમુર્વિદથાનિ ધીતિભિર્વિશ્વાનિ પરિભૂતિભિઃ ॥ ૭.૦૬૬.૧૦
વિ યે દધુઃ શરદં માસમાદહર્યજ્ઞમક્તું ચાદૃચમ્ ।
અનાપ્યં વરુણો મિત્રો અર્યમા ક્ષત્રં રાજાન આશત ॥ ૭.૦૬૬.૧૧
તદ્વો અદ્ય મનામહે સૂક્તૈઃ સૂર ઉદિતે ।
યદોહતે વરુણો મિત્રો અર્યમા યૂયમૃતસ્ય રથ્યઃ ॥ ૭.૦૬૬.૧૨
ઋતાવાન ઋતજાતા ઋતાવૃધો ઘોરાસો અનૃતદ્વિષઃ ।
તેષાં વઃ સુમ્ને સુચ્છર્દિષ્ટમે નરઃ સ્યામ યે ચ સૂરયઃ ॥ ૭.૦૬૬.૧૩
ઉદુ ત્યદ્દર્શતં વપુર્દિવ એતિ પ્રતિહ્વરે ।
યદીમાશુર્વહતિ દેવ એતશો વિશ્વસ્મૈ ચક્ષસે અરમ્ ॥ ૭.૦૬૬.૧૪
શીર્ષ્ણઃશીર્ષ્ણો જગતસ્તસ્થુષસ્પતિં સમયા વિશ્વમા રજઃ ।

સપ્ત સ્વસારઃ સુવિતાય સૂર્યં વહન્તિ હરિતો રથે ॥ ૭.૦૬૬.૧૫

તચ્ચક્ષુર્દેવહિતં શુક્રમુચ્ચરત્ ।

પશ્યેમ શરદઃ શતં જીવેમ શરદઃ શતમ્ ॥ ૭.૦૬૬.૧૬

કાવ્યેભિરદાભ્યા યાતં વરુણ દ્યુમત્ ।

મિત્રશ્ચ સોમપીતયે ॥ ૭.૦૬૬.૧૭

દિવો ધામભિર્વરુણ મિત્રશ્ચા યાતમદ્રુહા ।

પિબતં સોમમાતુજી ॥ ૭.૦૬૬.૧૮

આ યાતં મિત્રાવરુણા જુષાણાવાહુતિં નરા ।

પાતં સોમમૃતાવૃધા ॥ ૭.૦૬૬.૧૯

પ્રતિ વાં રથં નૃપતી જરધ્યૈ હવિષ્મતા મનસા યજ્ઞિયેન ।

યો વાં દૂતો ન ધિષ્ણ્યાવજીગરચ્છા સૂનુર્ન પિતરા વિવક્મિ ॥ ૭.૦૬૭.૦૧

અશોચ્યગ્નિઃ સમિધાનો અસ્મે ઉપો અદૃશ્રન્તમસશ્ચિદન્તાઃ ।

અચેતિ કેતુરુષસઃ પુરસ્તાચ્છ્રિયે દિવો દુહિતુર્જાયમાનઃ ॥ ૭.૦૬૭.૦૨

અભિ વાં નૂનમશ્વિના સુહોતા સ્તોમૈઃ સિષક્તિ નાસત્યા વિવક્વાન્ ।

પૂર્વીભિર્યાતં પથ્યાભિરર્વાક્સ્વર્વિદા વસુમતા રથેન ॥ ૭.૦૬૭.૦૩

અવોર્વાં નૂનમશ્વિના યુવાકુર્હુવે યદ્વાં સુતે માધ્વી વસૂયુઃ ।

આ વાં વહન્તુ સ્થવિરાસો અશ્વાઃ પિબાથો અસ્મે સુષુતા મધૂનિ ॥ ૭.૦૬૭.૦૪

પ્રાચીમુ દેવાશ્વિના ધિયં મેઽમૃધ્રાં સાતયે કૃતં વસૂયુમ્ ।

વિશ્વા અવિષ્ટં વાજ આ પુરંધીસ્તા નઃ શક્તં શચીપતી શચીભિઃ ॥ ૭.૦૬૭.૦૫

અવિષ્ટં ધીષ્વશ્વિના ન આસુ પ્રજાવદ્રેતો અહ્રયં નો અસ્તુ ।

આ વાં તોકે તનયે તૂતુજાનાઃ સુરત્નાસો દેવવીતિં ગમેમ ॥ ૭.૦૬૭.૦૬

એષ સ્ય વાં પૂર્વગત્વેવ સખ્યે નિધિર્હિતો માધ્વી રાતો અસ્મે ।

અહેળતા મનસા યાતમર્વાગશ્નન્તા હવ્યં માનુષીષુ વિક્ષુ ॥ ૭.૦૬૭.૦૭

એકસ્મિન્યોગે ભુરણા સમાને પરિ વાં સપ્ત સ્રવતો રથો ગાત્ ।

ન વાયન્તિ સુભ્વો દેવયુક્તા યે વાં ધૂર્ષુ તરણયો વહન્તિ ॥ ૭.૦૬૭.૦૮

અસશ્ચતા મઘવદ્ભ્યો હિ ભૂતં યે રાયા મઘદેયં જુનન્તિ ।

પ્ર યે બન્ધું સૂનૃતાભિસ્તિરન્તે ગવ્યા પૃઞ્ચન્તો અશ્વ્યા મઘાનિ ॥ ૭.૦૬૭.૦૯

નૂ મે હવમા શૃણુતં યુવાના યાસિષ્ટં વર્તિરશ્વિનાવિરાવત્ ।
ધત્તં રત્નાનિ જરતં ચ સૂરીન્યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૬૭.૧૦

આ શુભ્રા યાતમશ્વિના સ્વશ્વા ગિરો દસ્રા જુજુષાણા યુવાકોઃ ।
હવ્યાનિ ચ પ્રતિભૃતા વીતં નઃ ॥ ૭.૦૬૮.૦૧
પ્ર વામન્ધાંસિ મદ્યાન્યસ્થુરરં ગન્તં હવિષો વીતયે મે ।
તિરો અર્યો હવનાનિ શ્રુતં નઃ ॥ ૭.૦૬૮.૦૨
પ્ર વાં રથો મનોજવા ઇયર્તિ તિરો રજાંસ્યશ્વિના શતોતિઃ ।
અસ્મભ્યં સૂર્યાવસૂ ઇયાનઃ ॥ ૭.૦૬૮.૦૩
અયં હ યદ્વાં દેવયા ઉ અદ્રિરૂર્ધ્વો વિવક્તિ સોમસુદ્યુવભ્યામ્ ।
આ વલ્ગૂ વિપ્રો વવૃતીત હવ્યૈઃ ॥ ૭.૦૬૮.૦૪
ચિત્રં હ યદ્વાં ભોજનં ન્વસ્તિ ન્યત્રયે મહિષ્વન્તં યુયોતમ્ ।
યો વામોમાનં દધતે પ્રિયઃ સન્ ॥ ૭.૦૬૮.૦૫
ઉત ત્યદ્વાં જુરતે અશ્વિના ભૂચ્ચ્યવાનાય પ્રતીત્યં હવિર્દે ।
અધિ યદ્વર્પ ઇતઊતિ ધત્થઃ ॥ ૭.૦૬૮.૦૬
ઉત ત્યં ભુજ્યુમશ્વિના સખાયો મધ્યે જહુર્દુરેવાસઃ સમુદ્રે ।
નિરીં પર્ષદરાવા યો યુવાકુઃ ॥ ૭.૦૬૮.૦૭
વૃકાય ચિજ્જસમાનાય શક્તમુત શ્રુતં શયવે હૂયમાના ।
યાવઘ્ન્યામપિન્વતમપો ન સ્તર્યં ચિચ્છક્ત્યશ્વિના શચીભિઃ ॥ ૭.૦૬૮.૦૮
એષ સ્ય કારુર્જરતે સૂક્તૈરગ્રે બુધાન ઉષસાં સુમન્મા ।
ઇષા તં વર્ધદઘ્ન્યા પયોભિર્યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૬૮.૦૯

આ વાં રથો રોદસી બદ્બધાનો હિરણ્યયો વૃષભિર્યાત્વશ્વૈઃ ।
ઘૃતવર્તનિઃ પવિભી રુચાન ઇષાં વોળ્હા નૃપતિર્વાજિનીવાન્ ॥ ૭.૦૬૯.૦૧
સ પપ્રથાનો અભિ પઞ્ચ ભૂમા ત્રિવન્ધુરો મનસા યાતુ યુક્તઃ ।
વિશો યેન ગચ્છથો દેવયન્તીઃ કુત્રા ચિદ્યામમશ્વિના દધાના ॥ ૭.૦૬૯.૦૨
સ્વશ્વા યશસા યાતમર્વાગ્દસ્રા નિધિં મધુમન્તં પિબાથઃ ।
વિ વાં રથો વધ્વા૩ યાદમાનોઽન્તાન્દિવો બાધતે વર્તનિભ્યામ્ ॥ ૭.૦૬૯.૦૩
યુવોઃ શ્રિયં પરિ યોષાવૃણીત સૂરો દુહિતા પરિતક્મ્યાયામ્ ।

યદ્દેવયન્તમવથઃ શચીભિઃ પરિ ઘ્રંસમોમના વાં વયો ગાત્ ॥ ૭.૦૬૯.૦૪
યો હ સ્ય વાં રથિરા વસ્ત ઉસ્રા રથો યુજાનઃ પરિયાતિ વર્તિઃ ।
તેન નઃ શં યોરુષસો વ્યુષ્ટૌ ન્યશ્વિના વહતં યજ્ઞે અસ્મિન્ ॥ ૭.૦૬૯.૦૫
નરા ગૌરેવ વિદ્યુતં તૃષાણાસ્માકમદ્ય સવનોપ યાતમ્ ।
પુરુત્રા હિ વાં મતિભિર્હવન્તે મા વામન્યે નિ યમન્દેવયન્તઃ ॥ ૭.૦૬૯.૦૬
યુવં ભુજ્યુમવવિદ્ધં સમુદ્ર ઉદૂહથુરર્ણસો અસ્રિધાનૈઃ ।
પતત્રિભિરશ્રમૈરવ્યથિભિર્દંસનાભિરશ્વિના પારયન્તા ॥ ૭.૦૬૯.૦૭
નૂ મે હવમા શ૰ૃણુતં યુવાના યાસિષ્ટં વર્તિરશ્વિનાવિરાવત્ ।
ધત્તં રત્નાનિ જરતં ચ સૂરીન્યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૬૯.૦૮

આ વિશ્વવારાશ્વિના ગતં નઃ પ્ર તત્સ્થાનમવાચિ વાં પૃથિવ્યામ્ ।
અશ્વો ન વાજી શુનપૃષ્ઠો અસ્થાદા યત્સેદથુર્ધ્રુવસે ન યોનિમ્ ॥ ૭.૦૭૦.૦૧
સિષક્તિ સા વાં સુમતિશ્ચનિષ્ઠાતાપિ ઘર્મો મનુષો દુરોણે ।
યો વાં સમુદ્રાન્સરિતઃ પિપર્ત્યેતગ્વા ચિન્ન સુયુજા યુજાનઃ ॥ ૭.૦૭૦.૦૨
યાનિ સ્થાનાન્યશ્વિના દધાથે દિવો યહ્વીષ્વોષધીષુ વિક્ષુ ।
નિ પર્વતસ્ય મૂર્ધનિ સદન્તેષં જનાય દાશુષે વહન્તા ॥ ૭.૦૭૦.૦૩
ચનિષ્ટં દેવા ઓષધીષ્વપ્સુ યદ્યોગ્યા અશ્નવૈથે ઋષીણામ્ ।
પુરૂણિ રત્ના દધતૌ ન્યસ્મે અનુ પૂર્વાણિ ચખ્યથુર્યુગાનિ ॥ ૭.૦૭૦.૦૪
શુશ્રુવાંસા ચિદશ્વિના પુરૂણ્યભિ બ્રહ્માણિ ચક્ષાથે ઋષીણામ્ ।
પ્રતિ પ્ર યાતં વરમા જનાયાસ્મે વામસ્તુ સુમતિશ્ચનિષ્ઠા ॥ ૭.૦૭૦.૦૫
યો વાં યજ્ઞો નાસત્યા હવિષ્માન્કૃતબ્રહ્મા સમર્યો૩ ભવાતિ ।
ઉપ પ્ર યાતં વરમા વસિષ્ઠમિમા બ્રહ્માણ્યૃચ્યન્તે યુવભ્યામ્ ॥ ૭.૦૭૦.૦૬
ઇયં મનીષા ઇયમશ્વિના ગીરિમાં સુવૃક્તિં વૃષણા જુષેથામ્ ।
ઇમા બ્રહ્માણિ યુવયૂન્યગ્મન્યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૭૦.૦૭

અપ સ્વસુરુષસો નગ્જિહીતે રિણક્તિ કૃષ્ણીરરુષાય પન્થામ્ ।
અશ્વામઘા ગોમઘા વાં હુવેમ દિવા નક્તં શરુમસ્મદ્યુયોતમ્ ॥ ૭.૦૭૧.૦૧
ઉપાયાતં દાશુષે મર્ત્યાય રથેન વામમશ્વિના વહન્તા ।
યુયુતમસ્મદનિરામમીવાં દિવા નક્તં માધ્વી ત્રાસીથાં નઃ ॥ ૭.૦૭૧.૦૨

આ વાં રથમવમસ્યાં વ્યુષ્ટૌ સુમ્નાયવો વૃષણો વર્તયન્તુ ।
સ્યૂમગભસ્તિમૃતયુગ્ભિરશ્વૈરાશ્વિના વસુમન્તં વહેથામ્ ॥ ૭.૦૭૧.૦૩
યો વાં રથો નૃપતી અસ્તિ વોળ્હા ત્રિવન્ધુરો વસુમાઁ ઉસ્રયામા ।
આ ન એના નાસત્યોપ યાતમભિ યદ્વાં વિશ્વપ્સ્ન્યો જિગાતિ ॥ ૭.૦૭૧.૦૪
યુવં ચ્યવાનં જરસોઽમુમુક્તં નિ પેદવ ઊહથુરાશુમશ્વમ્ ।
નિરંહસસ્તમસઃ સ્પર્તમત્રિં નિ જાહુષં શિથિરે ધાતમન્તઃ ॥ ૭.૦૭૧.૦૫
ઇયં મનીષા ઇયમશ્વિના ગીરિમાં સુવૃક્તિં વૃષણા જુષેથામ્ ।
ઇમા બ્રહ્માણિ યુવયૂન્યગ્મન્યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૭૧.૦૬

આ ગોમતા નાસત્યા રથેનાશ્વાવતા પુરુશ્ચન્દ્રેણ યાતમ્ ।
અભિ વાં વિશ્વા નિયુતઃ સચન્તે સ્પાર્હયા શ્રિયા તન્વા શુભાના ॥ ૭.૦૭૨.૦૧
આ નો દેવેભિરુપ યાતમર્વાક્સજોષસા નાસત્યા રથેન ।
યુવોર્હિ નઃ સખ્યા પિત્ર્યાણિ સમાનો બન્ધુરુત તસ્ય વિત્તમ્ ॥ ૭.૦૭૨.૦૨
ઉદુ સ્તોમાસો અશ્વિનોરબુધ્રઞ્જામિ બ્રહ્માણ્યુષસશ્ચ દેવીઃ ।
આવિવાસન્રોદસી ધિષ્ણ્યેમે અચ્છા વિપ્રો નાસત્યા વિવક્તિ ॥ ૭.૦૭૨.૦૩
વિ ચેદુચ્છન્ત્યશ્વિના ઉષાસઃ પ્ર વાં બ્રહ્માણિ કારવો ભરન્તે ।
ઊર્ધ્વં ભાનું સવિતા દેવો અશ્રેદ્બૃહદગ્નયઃ સમિધા જરન્તે ॥ ૭.૦૭૨.૦૪
આ પશ્ચાતાન્નાસત્યા પુરસ્તાદાશ્વિના યાતમધરાદુદક્તાત્ ।
આ વિશ્વતઃ પાઞ્ચજન્યેન રાયા યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૭૨.૦૫

અતારિષ્મ તમસસ્પારમસ્ય પ્રતિ સ્તોમં દેવયન્તો દધાનાઃ ।
પુરુદંસા પુરુતમા પુરાજામર્ત્યા હવતે અશ્વિના ગીઃ ॥ ૭.૦૭૩.૦૧
ન્યુ પ્રિયો મનુષઃ સાદિ હોતા નાસત્યા યો યજતે વન્દતે ચ ।
અશ્નીતં મધ્વો અશ્વિના ઉપાક આ વાં વોચે વિદથેષુ પ્રયસ્વાન્ ॥ ૭.૦૭૩.૦૨
અહેમ યજ્ઞં પથામુરાણા ઇમાં સુવૃક્તિં વૃષણા જુષેથામ્ ।
શ્રુષ્ટીવેવ પ્રેષિતો વામબોધિ પ્રતિ સ્તોમૈર્જરમાણો વસિષ્ઠઃ ॥ ૭.૦૭૩.૦૩
ઉપ ત્યા વહ્ની ગમતો વિશં નો રક્ષોહણા સમ્ભૃતા વીળુપાણી ।
સમન્ધાંસ્યગ્મત મત્સરાણિ મા નો મર્ધિષ્ટમા ગતં શિવેન ॥ ૭.૦૭૩.૦૪
આ પશ્ચાતાન્નાસત્યા પુરસ્તાદાશ્વિના યાતમધરાદુદક્તાત્ ।

આ વિશ્વતઃ  પાઞ્ચજન્યેન રાયા યૂયં પાત સ્વસ્તિભિઃ  સદા  નઃ ॥ ૭.૦૭૩.૦૫

ઇમા ઉ  વાં  દિવિષ્ટય ઉસ્રા હવન્તે અશ્વિના ।

અયં વામહ્વેઽવસે શચીવસૂ  વિશંવિશં  હિ ગચ્છથઃ ॥ ૭.૦૭૪.૦૧

યુવં ચિત્રં દદથુર્ભોજનં નરા  ચોદેથાં સૂનૃતાવતે ।

અર્વાગ્રથં  સમનસા  નિ યચ્છતં  પિબતં સોમ્યં મધુ  ॥ ૭.૦૭૪.૦૨

આ યાતમુપ  ભૂષતં  મધ્વઃ  પિબતમશ્વિના ।

દુગ્ધં પયો  વૃષણા જેન્યાવસૂ  મા નો  મર્ધિષ્ટમા ગતમ્ ॥ ૭.૦૭૪.૦૩

અશ્વાસો  યે વામુપ  દાશુષો  ગૃહં યુવાં દીયન્તિ  બિભ્રતઃ ।

મક્ષૂયુભિર્નરા  હયેભિરશ્વિના દેવા યાતમસ્મયૂ ॥ ૭.૦૭૪.૦૪

અધા  હ  યન્તો  અશ્વિના  પૃક્ષઃ  સચન્ત સૂરયઃ  ।

તા યંસતો મઘવદ્ભ્યો ધ્રુવં યશશ્છર્દિરસ્મભ્યં  નાસત્યા ॥ ૭.૦૭૪.૦૫

પ્ર યે યયુરવૃકાસો  રથા  ઇવ નૃપાતારો  જનાનામ્ ।

ઉત સ્વેન  શવસા શૂશુવુર્નર  ઉત ક્ષિયન્તિ સુક્ષિતિમ્ ॥ ૭.૦૭૪.૦૬

વ્યુ૧ષા આવો દિવિજા ઋતેનાવિષ્કૃણ્વાના મહિમાનમાગાત્ ।

અપ  દ્રુહસ્તમ  આવરજુષ્ટમઙ્ગિરસ્તમા પથ્યા  અજીગઃ ॥ ૭.૦૭૫.૦૧

મહે નો  અદ્ય સુવિતાય  બોધ્યુષો  મહે સૌભગાય  પ્ર યન્ધિ ।

ચિત્રં રયિં યશસં  ધેહ્યસ્મે દેવિ  મર્તેષુ માનુષિ શ્રવસ્યુમ્ ॥ ૭.૦૭૫.૦૨

એતે ત્યે ભાનવો  દર્શતાયાશ્ચિત્રા ઉષસો  અમૃતાસ  આગુઃ  ।

જનયન્તો  દૈવ્યાનિ વ્રતાન્યાપૃણન્તો  અન્તરિક્ષા  વ્યસ્થુઃ ॥ ૭.૦૭૫.૦૩

એષા સ્યા યુજાના પરાકાત્પઞ્ચ  ક્ષિતીઃ પરિ  સદ્યો જિગાતિ ।

અભિપશ્યન્તી વયુના  જનાનાં દિવો દુહિતા ભુવનસ્ય  પત્ની  ॥ ૭.૦૭૫.૦૪

વાજિનીવતી  સૂર્યસ્ય  યોષા  ચિત્રામઘા રાય ઈશે  વસૂનામ્ ।

ઋષિષ્ટુતા જરયન્તી મઘોન્યુષા ઉચ્છતિ  વહ્નિભિર્ગૃણાના ॥ ૭.૦૭૫.૦૫

પ્રતિ  દ્યુતાનામરુષાસો  અશ્વાશ્ચિત્રા અદૃશ્રન્નુષસં  વહન્તઃ ।

યાતિ  શુભ્રા વિશ્વપિશા  રથેન  દધાતિ  રત્નં  વિધતે જનાય ॥ ૭.૦૭૫.૦૬

સત્યા સત્યેભિર્મહતી મહદ્ભિર્દેવી દેવેભિર્યજતા યજત્રૈઃ ।

રુજદ્દૃળ્હાનિ  દદદુસ્રિયાણાં  પ્રતિ  ગાવ  ઉષસં  વાવશન્ત ॥ ૭.૦૭૫.૦૭

નૂ નો ગોમદ્વીરવદ્ધેહિ રત્નમુષો અશ્વાવત્પુરુભોજો અસ્મે ।
મા નો બર્હિઃ પુરુષતા નિદે કર્યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૭૫.૦૮

ઉદુ જ્યોતિરમૃતં વિશ્વજન્યં વિશ્વાનરઃ સવિતા દેવો અશ્રેત્ ।
ક્રત્વા દેવાનામજનિષ્ટ ચક્ષુરાવિરકર્ભુવનં વિશ્વમુષાઃ ॥ ૭.૦૭૬.૦૧
પ્ર મે પન્થા દેવયાના અદૃશ્રન્નમર્ધન્તો વસુભિરિષ્કૃતાસઃ ।
અભૂદુ કેતુરુષસઃ પુરસ્તાત્પ્રતીચ્યાગાદધિ હર્મ્યેભ્યઃ ॥ ૭.૦૭૬.૦૨
તાનીદહાનિ બહુલાન્યાસન્યા પ્રાચીનમુદિતા સૂર્યસ્ય ।
યતઃ પરિ જાર ઇવાચરન્ત્યુષો દદૃક્ષે ન પુનર્યતીવ ॥ ૭.૦૭૬.૦૩
ત ઇદ્દેવાનાં સધમાદ આસન્નૃતાવાનઃ કવયઃ પૂર્વ્યાસઃ ।
ગૂળ્હં જ્યોતિઃ પિતરો અન્વવિન્દન્સત્યમન્ત્રા અજનયન્નુષાસમ્ ॥ ૭.૦૭૬.૦૪
સમાન ઊર્વે અધિ સંગતાસઃ સં જાનતે ન યતન્તે મિથસ્તે ।
તે દેવાનાં ન મિનન્તિ વ્રતાન્યમર્ધન્તો વસુભિર્યાદમાનાઃ ॥ ૭.૦૭૬.૦૫
પ્રતિ ત્વા સ્તોમૈરીળતે વસિષ્ઠા ઉષર્બુધઃ સુભગે તુષ્ટુવાંસઃ ।
ગવાં નેત્રી વાજપત્ની ન ઉચ્છોષઃ સુજાતે પ્રથમા જરસ્વ ॥ ૭.૦૭૬.૦૬
એષા નેત્રી રાધસઃ સૂનૃતાનામુષા ઉચ્છન્તી રિભ્યતે વસિષ્ઠૈઃ ।
દીર્ઘશ્રુતં રયિમસ્મે દધાના યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૭૬.૦૭

ઉપો રુરુચે યુવતિર્ન યોષા વિશ્વં જીવં પ્રસુવન્તી ચરાયૈ ।
અભૂદગ્નિઃ સમિધે માનુષાણામકર્જ્યોતિર્બાધમાના તમાંસિ ॥ ૭.૦૭૭.૦૧
વિશ્વં પ્રતીચી સપ્રથા ઉદસ્થાદ્રુશદ્વાસો બિભ્રતી શુક્રમશ્વૈત્ ।
હિરણ્યવર્ણા સુદૃશીકસંદૃગ્ગવાં માતા નેત્ર્યહ્નામરોચિ ॥ ૭.૦૭૭.૦૨
દેવાનાં ચક્ષુઃ સુભગા વહન્તી શ્વેતં નયન્તી સુદૃશીકમશ્વમ્ ।
ઉષા અદર્શિ રશ્મિભિર્વ્યક્તા ચિત્રામઘા વિશ્વમનુ પ્રભૂતા ॥ ૭.૦૭૭.૦૩
અન્તિવામા દૂરે અમિત્રમુચ્છોર્વીં ગવ્યૂતિમભયં કૃધી નઃ ।
યાવય દ્વેષ આ ભરા વસૂનિ ચોદય રાધો ગૃણતે મઘોનિ ॥ ૭.૦૭૭.૦૪
અસ્મે શ્રેષ્ઠેભિર્ભાનુભિર્વિ ભાહ્યુષો દેવિ પ્રતિરન્તી ન આયુઃ ।
ઇષં ચ નો દધતી વિશ્વવારે ગોમદશ્વાવદ્રથવચ્ચ રાધઃ ॥ ૭.૦૭૭.૦૫
યાં ત્વા દિવો દુહિતર્વર્ધયન્ત્યુષઃ સુજાતે મતિભિર્વસિષ્ઠાઃ ।

સાસ્માસુ ધા રયિમૃષ્વં બૃહન્તં યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૭૭.૦૬

પ્રતિ કેતવઃ પ્રથમા અદૃશ્રન્નૂર્ધ્વા અસ્યા અઞ્જયો વિ શ્રયન્તે ।
ઉષો અર્વાચા બૃહતા રથેન જ્યોતિષ્મતા વામમસ્મભ્યં વક્ષિ ॥ ૭.૦૭૮.૦૧
પ્રતિ ષીમગ્નિર્જરતે સમિદ્ધઃ પ્રતિ વિપ્રાસો મતિભિર્ગૃણન્તઃ ।
ઉષા યાતિ જ્યોતિષા બાધમાના વિશ્વા તમાંસિ દુરિતાપ દેવી ॥ ૭.૦૭૮.૦૨
એતા ઉ ત્યાઃ પ્રત્યદૃશ્રન્પુરસ્તાજ્જ્યોતિર્યચ્છન્તીરુષસો વિભાતીઃ ।
અજીજનન્સૂર્યં યજ્ઞમગ્નિમપાચીનં તમો અગાદજુષ્ટમ્ ॥ ૭.૦૭૮.૦૩
અચેતિ દિવો દુહિતા મઘોની વિશ્વે પશ્યન્ત્યુષસં વિભાતીમ્ ।
આસ્થાદ્રથં સ્વધયા યુજ્યમાનમા યમશ્વાસઃ સુયુજો વહન્તિ ॥ ૭.૦૭૮.૦૪
પ્રતિ ત્વાદ્ય સુમનસો બુધન્તાસ્માકાસો મઘવાનો વયં ચ ।
તિલ્વિલાયધ્વમુષસો વિભાતીર્યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૭૮.૦૫

વ્યુ૧ષા આવઃ પથ્યા૩ જનાનાં પઞ્ચ ક્ષિતીર્માનુષીર્બોધયન્તી ।
સુસંદૃગ્ભિરુક્ષભિર્ભાનુમશ્રેદ્વિ સૂર્યો રોદસી ચક્ષસાવઃ ॥ ૭.૦૭૯.૦૧
વ્યઞ્જતે દિવો અન્તેષ્વક્તૂન્વિશો ન યુક્તા ઉષસો યતન્તે ।
સં તે ગાવસ્તમ આ વર્તયન્તિ જ્યોતિર્યચ્છન્તિ સવિતેવ બાહૂ ॥ ૭.૦૭૯.૦૨
અભૂદુષા ઇન્દ્રતમા મઘોન્યજીજનત્સુવિતાય શ્રવાંસિ ।
વિ દિવો દેવી દુહિતા દધાત્યઙ્ગિરસ્તમા સુકૃતે વસૂનિ ॥ ૭.૦૭૯.૦૩
તાવદુષો રાધો અસ્મભ્યં રાસ્વ યાવત્સ્તોતૃભ્યો અરદો ગૃણાના ।
યાં ત્વા જજ્ઞુર્વૃષભસ્યા રવેણ વિ દૃળ્હસ્ય દુરો અદ્રેરૌર્ણોઃ ॥ ૭.૦૭૯.૦૪
દેવંદેવં રાધસે ચોદયન્ત્યસ્મદ્ર્યક્સૂનૃતા ઈરયન્તી ।
વ્યુચ્છન્તી નઃ સનયે ધિયો ધા યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૭૯.૦૫

પ્રતિ સ્તોમેભિરુષસં વસિષ્ઠા ગીર્ભિર્વિપ્રાસઃ પ્રથમા અબુધ્રન્ ।
વિવર્તયન્તીં રજસી સમન્તે આવિષ્કૃણ્વતીં ભુવનાનિ વિશ્વા ॥ ૭.૦૮૦.૦૧
એષા સ્યા નવ્યમાયુર્દધાના ગૂઢ્વી તમો જ્યોતિષોષા અબોધિ ।
અગ્ર એતિ યુવતિરહ્રયાણા પ્રાચિકિતત્સૂર્યં યજ્ઞમગ્નિમ્ ॥ ૭.૦૮૦.૦૨
અશ્વાવતીર્ગોમતીર્ન ઉષાસો વીરવતીઃ સદમુચ્છન્તુ ભદ્રાઃ ।
ઘૃતં દુહાના વિશ્વતઃ પ્રપીતા યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૮૦.૦૩

પ્રત્યુ અદર્શ્યાયત્યુ૧ચ્છન્તી દુહિતા દિવઃ ।
અપો મહિ વ્યયતિ ચક્ષસે તમો જ્યોતિષ્કૃણોતિ સૂનરી ॥ ૭.૦૮૧.૦૧
ઉદુસ્રિયાઃ સૃજતે સૂર્યઃ સચાઁ ઉદ્યન્નક્ષત્રમર્ચિવત્ ।
તવેદુષો વ્યુષિ સૂર્યસ્ય ચ સં ભક્તેન ગમેમહિ ॥ ૭.૦૮૧.૦૨
પ્રતિ ત્વા દુહિતર્દિવ ઉષો જીરા અભુત્સ્મહિ ।
યા વહસિ પુરુ સ્પાર્હં વનન્વતિ રત્નં ન દાશુષે મયઃ ॥ ૭.૦૮૧.૦૩
ઉચ્છન્તી યા કૃણોષિ મંહના મહિ પ્રખ્યૈ દેવિ સ્વર્દૃશે ।
તસ્યાસ્તે રત્નભાજ ઈમહે વયં સ્યામ માતુર્ન સૂનવઃ ॥ ૭.૦૮૧.૦૪
તચ્ચિત્રં રાધ આ ભરોષો યદ્દીર્ઘશ્રુત્તમમ્ ।
યત્તે દિવો દુહિતર્મર્તભોજનં તદ્રાસ્વ ભુનજામહૈ ॥ ૭.૦૮૧.૦૫
શ્રવઃ સૂરિભ્યો અમૃતં વસુત્વનં વાજાઁ અસ્મભ્યં ગોમતઃ ।
ચોદયિત્રી મઘોનઃ સૂનૃતાવત્યુષા ઉચ્છદપ સ્રિધઃ ॥ ૭.૦૮૧.૦૬
ઇન્દ્રાવરુણા યુવમધ્વરાય નો વિશે જનાય મહિ શર્મ યચ્છતમ્ ।
દીર્ઘપ્રયજ્યુમતિ યો વનુષ્યતિ વયં જયેમ પૃતનાસુ દૂઢ્યઃ ॥ ૭.૦૮૨.૦૧
સમ્રાળન્યઃ સ્વરાળન્ય ઉચ્યતે વાં મહાન્તાવિન્દ્રાવરુણા મહાવસૂ ।
વિશ્વે દેવાસઃ પરમે વ્યોમનિ સં વામોજો વૃષણા સં બલં દધુઃ ॥ ૭.૦૮૨.૦૨
અન્વપાં ખાન્યતૃન્તમોજસા સૂર્યમૈરયતં દિવિ પ્રભુમ્ ।
ઇન્દ્રાવરુણા મદે અસ્ય માયિનોઽપિન્વતમપિતઃ પિન્વતં ધિયઃ ॥ ૭.૦૮૨.૦૩
યુવામિદ્યુત્સુ પૃતનાસુ વહ્નયો યુવાં ક્ષેમસ્ય પ્રસવે મિતજ્ઞવઃ ।
ઈશાના વસ્વ ઉભયસ્ય કારવ ઇન્દ્રાવરુણા સુહવા હવામહે ॥ ૭.૦૮૨.૦૪
ઇન્દ્રાવરુણા યદિમાનિ ચક્રથુર્વિશ્વા જાતાનિ ભુવનસ્ય મજ્મના ।
ક્ષેમેણ મિત્રો વરુણં દુવસ્યતિ મરુદ્ભિરુગ્રઃ શુભમન્ય ઈયતે ॥ ૭.૦૮૨.૦૫
મહે શુલ્કાય વરુણસ્ય નુ ત્વિષ ઓજો મિમાતે ધ્રુવમસ્ય યત્સ્વમ્ ।
અજામિમન્યઃ શ્નથયન્તમાતિરદ્દભ્રેભિરન્યઃ પ્ર વૃણોતિ ભૂયસઃ ॥ ૭.૦૮૨.૦૬
ન તમંહો ન દુરિતાનિ મર્ત્યમિન્દ્રાવરુણા ન તપઃ કુતશ્ચન ।
યસ્ય દેવા ગચ્છથો વીથો અધ્વરં ન તં મર્તસ્ય નશતે પરિહ્વૃતિઃ ॥ ૭.૦૮૨.૦૭
અર્વાઙ્નરા દૈવ્યેનાવસા ગતં શ‍ૃણુતં હવં યદિ મે જુજોષથઃ ।

યુવોર્હિ સખ્યમુત વા યદાપ્યં માર્ડીકમિન્દ્રાવરુણા નિ યચ્છતમ્ ॥ ૭.૦૮૨.૦૮
અસ્માકમિન્દ્રાવરુણા ભરેભરે પુરોયોધા ભવતં કૃષ્ટ્યોજસા ।
યદ્વાં હવન્ત ઉભયે અધ સ્પૃધિ નરસ્તોકસ્ય તનયસ્ય સાતિષુ ॥ ૭.૦૮૨.૦૯
અસ્મે ઇન્દ્રો વરુણો મિત્રો અર્યમા દ્યુમ્નં યચ્છન્તુ મહિ શર્મ સપ્રથઃ ।
અવધ્રં જ્યોતિરદિતેરૃતાવૃધો દેવસ્ય શ્લોકં સવિતુર્મનામહે ॥ ૭.૦૮૨.૧૦

યુવાં નરા પશ્યમાનાસ આપ્યં પ્રાચા ગવ્યન્તઃ પૃથુપર્શવો યયુઃ ।
દાસા ચ વૃત્રા હતમાર્યાણિ ચ સુદાસમિન્દ્રાવરુણાવસાવતમ્ ॥ ૭.૦૮૩.૦૧
યત્રા નરઃ સમયન્તે કૃતધ્વજો યસ્મિન્નાજા ભવતિ કિં ચન પ્રિયમ્ ।
યત્રા ભયન્તે ભુવના સ્વર્દૃશસ્તત્રા ન ઇન્દ્રાવરુણાધિ વોચતમ્ ॥ ૭.૦૮૩.૦૨
સં ભૂમ્યા અન્તા ધ્વસિરા અદૃક્ષતેન્દ્રાવરુણા દિવિ ઘોષ આરુહત્ ।
અસ્થુર્જનાનામુપ મામરાતયોઽર્વાગવસા હવનશ્રુતા ગતમ્ ॥ ૭.૦૮૩.૦૩
ઇન્દ્રાવરુણા વધનાભિરપ્રતિ ભેદં વન્વન્તા પ્ર સુદાસમાવતમ્ ।
બ્રહ્માણ્યેષાં શ◌ૃણુતં હવીમનિ સત્યા તૃત્સૂનામભવત્પુરોહિતિઃ ॥ ૭.૦૮૩.૦૪
ઇન્દ્રાવરુણાવભ્યા તપન્તિ માઘાન્યર્યો વનુષામરાતયઃ ।
યુવં હિ વસ્વ ઉભયસ્ય રાજથોઽધ સ્મા નોઽવતં પાર્યે દિવિ ॥ ૭.૦૮૩.૦૫
યુવાં હવન્ત ઉભયાસ આજિષ્વિન્દ્રં ચ વસ્વો વરુણં ચ સાતયે ।
યત્ર રાજભિર્દશભિર્નિબાધિતં પ્ર સુદાસમાવતં તૃત્સુભિઃ સહ ॥ ૭.૦૮૩.૦૬
દશ રાજાનઃ સમિતા અયજ્યવઃ સુદાસમિન્દ્રાવરુણા ન યુયુધુઃ ।
સત્યા નૃણામદ્મસદામુપસ્તુતિર્દેવા એષામભવન્દેવહૂતિષુ ॥ ૭.૦૮૩.૦૭
દાશરાજ્ઞે પરિયત્તાય વિશ્વતઃ સુદાસ ઇન્દ્રાવરુણાવશિક્ષતમ્ ।
શ્વિત્યઞ્ચો યત્ર નમસા કપર્દિનો ધિયા ધીવન્તો અસપન્ત તૃત્સવઃ ॥ ૭.૦૮૩.૦૮
વૃત્રાણ્યન્યઃ સમિથેષુ જિઘ્નતે વ્રતાન્યન્યો અભિ રક્ષતે સદા ।
હવામહે વાં વૃષણા સુવૃક્તિભિરસ્મે ઇન્દ્રાવરુણા શર્મ યચ્છતમ્ ॥ ૭.૦૮૩.૦૯
અસ્મે ઇન્દ્રો વરુણો મિત્રો અર્યમા દ્યુમ્નં યચ્છન્તુ મહિ શર્મ સપ્રથઃ ।
અવધ્રં જ્યોતિરદિતેરૃતાવૃધો દેવસ્ય શ્લોકં સવિતુર્મનામહે ॥ ૭.૦૮૩.૧૦

આ વાં રાજાનાવધ્વરે વવૃત્યાં હવ્યેભિરિન્દ્રાવરુણા નમોભિઃ ।
પ્ર વાં ઘૃતાચી બાહ્વોર્દધાના પરિ ત્મના વિષુરૂપા જિગાતિ ॥ ૭.૦૮૪.૦૧

યુવો રાષ્ટ્રં બૃહદિન્વતિ દ્યૌર્યૌ સેતૃભિરરજ્જુભિઃ સિનીથઃ ।
પરિ નો હેળો વરુણસ્ય વૃજ્યા ઉરું ન ઇન્દ્રઃ કૃણવદુ લોકમ્ ॥ ૭.૦૮૪.૦૨
કૃતં નો યજ્ઞં વિદથેષુ ચારું કૃતં બ્રહ્માણિ સૂરિષુ પ્રશસ્તા ।
ઉપો રયિર્દેવજૂતો ન એતુ પ્ર ણઃ સ્પાર્હાભિરૂતિભિસ્તિરેતમ્ ॥ ૭.૦૮૪.૦૩
અસ્મે ઇન્દ્રાવરુણા વિશ્વવારં રયિં ધત્તં વસુમન્તં પુરુક્ષુમ્ ।
પ્ર ય આદિત્યો અનૃતા મિનાત્યમિતા શૂરો દયતે વસૂનિ ॥ ૭.૦૮૪.૦૪
ઇયમિન્દ્રં વરુણમષ્ટ મે ગીઃ પ્રાવત્તોકે તનયે તૂતુજાના ।
સુરત્નાસો દેવવીતિં ગમેમ યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૮૪.૦૫

પુનીષે વામરક્ષસં મનીષાં સોમમિન્દ્રાય વરુણાય જુહ્વત્ ।
ઘૃતપ્રતીકામુષસં ન દેવીં તા નો યામન્નુરુષ્યતામભીકે ॥ ૭.૦૮૫.૦૧
સ્પર્ધન્તે વા ઉ દેવહૂયે અત્ર યેષુ ધ્વજેષુ દિદ્યવઃ પતન્તિ ।
યુવં તાઁ ઇન્દ્રાવરુણાવમિત્રાન્હતં પરાચઃ શર્વા વિષૂચઃ ॥ ૭.૦૮૫.૦૨
આપશ્ચિદ્ધિ સ્વયશસઃ સદસ્સુ દેવીરિન્દ્રં વરુણં દેવતા ધુઃ ।
કૃષ્ટીરન્યો ધારયતિ પ્રવિક્તા વૃત્રાણ્યન્યો અપ્રતીનિ હન્તિ ॥ ૭.૦૮૫.૦૩
સ સુક્રતુરૃતચિદસ્તુ હોતા ય આદિત્ય શવસા વાં નમસ્વાન્ ।
આવવર્તદવસે વાં હવિષ્માનસદિત્સ સુવિતાય પ્રયસ્વાન્ ॥ ૭.૦૮૫.૦૪
ઇયમિન્દ્રં વરુણમષ્ટ મે ગીઃ પ્રાવત્તોકે તનયે તૂતુજાના ।
સુરત્નાસો દેવવીતિં ગમેમ યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૮૫.૦૫

ધીરા ત્વસ્ય મહિના જનૂંષિ વિ યસ્તસ્તમ્ભ રોદસી ચિદુર્વી ।
પ્ર નાકમૃષ્વં નુનુદે બૃહન્તં દ્વિતા નક્ષત્રં પપ્રથચ્ચ ભૂમ ॥ ૭.૦૮૬.૦૧
ઉત સ્વયા તન્વા૩ સં વદે તત્કદા ન્વ૧ન્તર્વરુણે ભુવાનિ ।
કિં મે હવ્યમહૃણાનો જુષેત કદા મૃળીકં સુમના અભિ ખ્યમ્ ॥ ૭.૦૮૬.૦૨
પૃચ્છે તદેનો વરુણ દિદૃક્ષૂપો એમિ ચિકિતુષો વિપૃચ્છમ્ ।
સમાનમિન્મે કવયશ્ચિદાહુરયં હ તુભ્યં વરુણો હૃણીતે ॥ ૭.૦૮૬.૦૩
કિમાગ આસ વરુણ જ્યેષ્ઠં યત્સ્તોતારં જિઘાંસસિ સખાયમ્ ।
પ્ર તન્મે વોચો દૂળભ સ્વધાવોઽવ ત્વાનેના નમસા તુર ઇયામ્ ॥ ૭.૦૮૬.૦૪
અવ દ્રુગ્ધાનિ પિત્ર્યા સૃજા નોઽવ યા વયં ચકૃમા તનૂભિઃ ।

અવ રાજન્પશુતૃપં ન તાયું સૃજા વત્સં ન દામ્નો વસિષ્ઠમ્ ॥ ૭.૦૮૬.૦૫
ન સ સ્વો દક્ષો વરુણ ધ્રુતિઃ સા સુરા મન્યુર્વિભીદકો અચિત્તિઃ ।
અસ્તિ જ્યાયાન્કનીયસ ઉપારે સ્વપ્નશ્ચનેદનૃતસ્ય પ્રયોતા ॥ ૭.૦૮૬.૦૬
અરં દાસો ન મીળ્હુષે કરાણ્યહં દેવાય ભૂર્ણયેઽનાગાઃ ।
અચેતયદચિતો દેવો અર્યો ગૃત્સં રાયે કવિતરો જુનાતિ ॥ ૭.૦૮૬.૦૭
અયં સુ તુભ્યં વરુણ સ્વધાવો હૃદિ સ્તોમ ઉપશ્રિતશ્ચિદસ્તુ ।
શં નઃ ક્ષેમે શમુ યોગે નો અસ્તુ યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૮૬.૦૮
રદત્પથો વરુણઃ સૂર્યાય પ્રાર્ણાંસિ સમુદ્રિયા નદીનામ્ ।
સર્ગો ન સૃષ્ટો અર્વતીરૃતાયઞ્ચકાર મહીરવનીરહભ્યઃ ॥ ૭.૦૮૭.૦૧
આત્મા તે વાતો રજ આ નવીનોત્પશુર્ન ભૂર્ણિર્યવસે સસવાન્ ।
અન્તર્મહી બૃહતી રોદસીમે વિશ્વા તે ધામ વરુણ પ્રિયાણિ ॥ ૭.૦૮૭.૦૨
પરિ સ્પશો વરુણસ્ય સ્મદિષ્ટા ઉભે પશ્યન્તિ રોદસી સુમેકે ।
ઋતાવાનઃ કવયો યજ્ઞધીરાઃ પ્રચેતસો ય ઇષયન્ત મન્મ ॥ ૭.૦૮૭.૦૩
ઉવાચ મે વરુણો મેધિરાય ત્રિઃ સપ્ત નામાઘ્ન્યા બિભર્તિ ।
વિદ્વાન્પદસ્ય ગુહ્યા ન વોચદ્યુગાય વિપ્ર ઉપરાય શિક્ષન્ ॥ ૭.૦૮૭.૦૪
તિસ્રો દ્યાવો નિહિતા અન્તરસ્મિન્તિસ્રો ભૂમીરુપરાઃ ષડ્વિધાનાઃ ।
ગૃત્સો રાજા વરુણશ્ચક્ર એતં દિવિ પ્રેઙ્ખં હિરણ્યયં શુભે કમ્ ॥ ૭.૦૮૭.૦૫
અવ સિન્ધું વરુણો દ્યૌરિવ સ્થાદ્દ્રપ્સો ન શ્વેતો મૃગસ્તુવિષ્માન્ ।
ગમ્ભીરશંસો રજસો વિમાનઃ સુપારક્ષત્રઃ સતો અસ્ય રાજા ॥ ૭.૦૮૭.૦૬
યો મૃળયાતિ ચક્રુષે ચિદાગો વયં સ્યામ વરુણે અનાગાઃ ।
અનુ વ્રતાન્યદિતેરૃધન્તો યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૮૭.૦૭
પ્ર શુન્ધ્યુવં વરુણાય પ્રેષ્ઠાં મતિં વસિષ્ઠ મીળ્હુષે ભરસ્વ ।
ય ઈમર્વાઞ્ચં કરતે યજત્રં સહસ્રામઘં વૃષણં બૃહન્તમ્ ॥ ૭.૦૮૮.૦૧
અધા ન્વસ્ય સંદૃશં જગન્વાનગ્નેરનીકં વરુણસ્ય મંસિ ।
સ્વ૧ર્યદશ્મન્નધિપા ઉ અન્ધોઽભિ મા વપુર્દૃશયે નિનીયાત્ ॥ ૭.૦૮૮.૦૨
આ યદ્રુહાવ વરુણશ્ચ નાવં પ્ર યત્સમુદ્રમીરયાવ મધ્યમ્ ।
અધિ યદપાં સ્નુભિશ્ચરાવ પ્ર પ્રેઙ્ખ ઈઙ્ખયાવહૈ શુભે કમ્ ॥ ૭.૦૮૮.૦૩

વસિષ્ઠં હ વરુણો નાવ્યાધાદૃષિં ચકાર સ્વપા મહોભિઃ ।
સ્તોતારં વિપ્રઃ સુદિનત્વે અહ્નાં યાન્નુ દ્યાવસ્તતનન્યાદુષાસઃ ॥ ૭.૦૮૮.૦૪
ક્વ૧ ત્યાનિ નૌ સખ્યા બભૂવુઃ સચાવહે યદવૃકં પુરા ચિત્ ।
બૃહન્તં માનં વરુણ સ્વધાવઃ સહસ્રદ્વારં જગમા ગૃહં તે ॥ ૭.૦૮૮.૦૫
ય આપિર્નિત્યો વરુણ પ્રિયઃ સન્ત્વામાગાંસિ કૃણવત્સખા તે ।
મા ત એનસ્વન્તો યક્ષિન્ભુજેમ યન્ધિ ષ્મા વિપ્રઃ સ્તુવતે વરૂથમ્ ॥ ૭.૦૮૮.૦૬
ધ્રુવાસુ ત્વાસુ ક્ષિતિષુ ક્ષિયન્તો વ્ય૧સ્મત્પાશં વરુણો મુમોચત્ ।
અવો વન્વાના અદિતેરુપસ્થાદ્યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૮૮.૦૭

મો ષુ વરુણ મૃન્મયં ગૃહં રાજન્નહં ગમમ્ ।
મૃળા સુક્ષત્ર મૃળય ॥ ૭.૦૮૯.૦૧
યદેમિ પ્રસ્ફુરન્નિવ દૃતિર્ન ધ્માતો અદ્રિવઃ ।
મૃળા સુક્ષત્ર મૃળય ॥ ૭.૦૮૯.૦૨
ક્રત્વઃ સમહ દીનતા પ્રતીપં જગમા શુચે ।
મૃળા સુક્ષત્ર મૃળય ॥ ૭.૦૮૯.૦૩
અપાં મધ્યે તસ્થિવાંસં તૃષ્ણાવિદજ્જરિતારમ્ ।
મૃળા સુક્ષત્ર મૃળય ॥ ૭.૦૮૯.૦૪
યત્કિં ચેદં વરુણ દૈવ્યે જનેઽભિદ્રોહં મનુષ્યાશ્ચરામસિ ।
અચિત્તી યત્તવ ધર્મા યુયોપિમ મા નસ્તસ્માદેનસો દેવ રીરિષઃ ॥ ૭.૦૮૯.૦૫

પ્ર વીરયા શુચયો દદ્રિરે વામધ્વર્યુભિર્મધુમન્તઃ સુતાસઃ ।
વહ વાયો નિયુતો યાહ્યચ્છા પિબા સુતસ્યાન્ધસો મદાય ॥ ૭.૦૯૦.૦૧
ઈશાનાય પ્રહુતિં યસ્ત આનટ્ છુચિં સોમં શુચિપાસ્તુભ્યં વાયો ।
કૃણોષિ તં મર્ત્યેષુ પ્રશસ્તં જાતોજાતો જાયતે વાજ્યસ્ય ॥ ૭.૦૯૦.૦૨
રાયે નુ યં જજ્ઞતૂ રોદસીમે રાયે દેવી ધિષણા ધાતિ દેવમ્ ।
અધ વાયું નિયુતઃ સશ્ચત સ્વા ઉત શ્વેતં વસુધિતિં નિરેકે ॥ ૭.૦૯૦.૦૩
ઉચ્છન્નુષસઃ સુદિના અરિપ્રા ઉરુ જ્યોતિર્વિવિદુર્દીધ્યાનાઃ ।
ગવ્યં ચિદૂર્વમુશિજો વિ વવ્રુસ્તેષામનુ પ્રદિવઃ સસ્રુરાપઃ ॥ ૭.૦૯૦.૦૪
તે સત્યેન મનસા દીધ્યાનાઃ સ્વેન યુક્તાસઃ ક્રતુના વહન્તિ ।

ઇન્દ્રવાયૂ વીરવાહં રથં વામીશાનયોરભિ પૃક્ષઃ સચન્તે ॥ ૭.૦૯૦.૦૫

ઈશાનાસો યે દધતે સ્વર્ણો ગોભિરશ્વેભિર્વસુભિર્હિરણ્યૈઃ ।
ઇન્દ્રવાયૂ સૂરયો વિશ્વમાયુરર્વદ્ભિર્વીરૈઃ પૃતનાસુ સહ્યુઃ ॥ ૭.૦૯૦.૦૬

અર્વન્તો ન શ્રવસો ભિક્ષમાણા ઇન્દ્રવાયૂ સુષ્ટુતિભિર્વસિષ્ઠાઃ ।
વાજયન્તઃ સ્વવસે હુવેમ યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૯૦.૦૭

કુવિદઙ્ગ નમસા યે વૃધાસઃ પુરા દેવા અનવદ્યાસ આસન્ ।
તે વાયવે મનવે બાધિતાયાવાસયન્નુષસં સૂર્યેણ ॥ ૭.૦૯૧.૦૧

ઉશન્તા દૂતા ન દભાય ગોપા માસશ્ચ પાથઃ શરદશ્ચ પૂર્વીઃ ।
ઇન્દ્રવાયૂ સુષ્ટુતિર્વામિયાના માર્ડીકમીટ્ટે સુવિતં ચ નવ્યમ્ ॥ ૭.૦૯૧.૦૨

પીવોઅન્નાઁ રયિવૃધઃ સુમેધાઃ શ્વેતઃ સિષક્તિ નિયુતામભિશ્રીઃ ।
તે વાયવે સમનસો વિ તસ્થુર્વિશ્વેન્નરઃ સ્વપત્યાનિ ચક્રુઃ ॥ ૭.૦૯૧.૦૩

યાવત્તરસ્તન્વોઉ યાવદોજો યાવન્નરશ્ચક્ષસા દીધ્યાનાઃ ।
શુચિં સોમં શુચિપા પાતમસ્મે ઇન્દ્રવાયૂ સદતં બર્હિરેદમ્ ॥ ૭.૦૯૧.૦૪

નિયુવાના નિયુતઃ સ્પાર્હવીરા ઇન્દ્રવાયૂ સરથં યાતમર્વાક્ ।
ઇદં હિ વાં પ્રભૃતં મધ્વો અગ્રમધ પ્રીણાના વિ મુમુક્તમસ્મે ॥ ૭.૦૯૧.૦૫

યા વાં શતં નિયુતો યાઃ સહસ્રમિન્દ્રવાયૂ વિશ્વવારાઃ સચન્તે ।
આભિર્યાતં સુવિદત્રાભિરર્વાક્પાતં નરા પ્રતિભૃતસ્ય મધ્વઃ ॥ ૭.૦૯૧.૦૬

અર્વન્તો ન શ્રવસો ભિક્ષમાણા ઇન્દ્રવાયૂ સુષ્ટુતિભિર્વસિષ્ઠાઃ ।
વાજયન્તઃ સ્વવસે હુવેમ યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૯૧.૦૭

આ વાયો ભૂષ શુચિપા ઉપ નઃ સહસ્રં તે નિયુતો વિશ્વવાર ।
ઉપો તે અન્ધો મદ્યમયામિ યસ્ય દેવ દધિષે પૂર્વપેયમ્ ॥ ૭.૦૯૨.૦૧

પ્ર સોતા જીરો અધ્વરેષ્વસ્થાત્સોમમિન્દ્રાય વાયવે પિબધ્યૈ ।
પ્ર યદ્વાં મધ્વો અગ્રિયં ભરન્ત્યધ્વર્યવો દેવયન્તઃ શચીભિઃ ॥ ૭.૦૯૨.૦૨

પ્ર યાભિર્યાસિ દાશ્વાંસમચ્છા નિયુદ્ભિર્વાયવિષ્ટયે દુરોણે ।
નિ નો રયિં સુભોજસં યુવસ્વ નિ વીરં ગવ્યમશ્વ્યં ચ રાધઃ ॥ ૭.૦૯૨.૦૩

યે વાયવ ઇન્દ્રમાદનાસ આદેવાસો નિતોશનાસો અર્યઃ ।
ઘ્નન્તો વૃત્રાણિ સૂરિભિઃ ષ્યામ સાસહ્વાંસો યુધા નૃભિરમિત્રાન્ ॥ ૭.૦૯૨.૦૪

આ નો નિયુદ્ભિઃ શતિનીભિરધ્વરં સહસ્રિણીભિરુપ યાહિ યજ્ઞમ્ ।
વાયો અસ્મિન્સવને માદયસ્વ યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૯૨.૦૫

શુચિં નુ સ્તોમં નવજાતમદ્યેન્દ્રાગ્ની વૃત્રહણા જુષેથામ્ ।
ઉભા હિ વાં સુહવા જોહવીમિ તા વાજં સદ્ય ઉશતે ધેષ્ઠા ॥ ૭.૦૯૩.૦૧
તા સાનસી શવસાના હિ ભૂતં સાકંવૃધા શવસા શૂશુવાંસા ।
ક્ષયન્તૌ રાયો યવસસ્ય ભૂરેઃ પૃઙ્ક્તં વાજસ્ય સ્થવિરસ્ય ઘૃષ્વેઃ ॥ ૭.૦૯૩.૦૨
ઉપો હ યદ્વિદથં વાજિનો ગુર્ધીભિર્વિપ્રાઃ પ્રમતિમિચ્છમાનાઃ ।
અર્વન્તો ન કાષ્ઠાં નક્ષમાણા ઇન્દ્રાગ્ની જોહુવતો નરસ્તે ॥ ૭.૦૯૩.૦૩
ગીર્ભિર્વિપ્રઃ પ્રમતિમિચ્છમાન ઈટ્ટે રયિં યશસં પૂર્વભાજમ્ ।
ઇન્દ્રાગ્ની વૃત્રહણા સુવજ્રા પ્ર નો નવ્યેભિસ્તિરતં દેષ્ણૈઃ ॥ ૭.૦૯૩.૦૪
સં યન્મહી મિથતી સ્પર્ધમાને તનૂરુચા શૂરસાતા યતૈતે ।
અદેવયું વિદથે દેવયુભિઃ સત્રા હતં સોમસુતા જનેન ॥ ૭.૦૯૩.૦૫
ઇમામુ ષુ સોમસુતિમુપ ન એન્દ્રાગ્ની સૌમનસાય યાતમ્ ।
નૂ ચિદ્ધિ પરિમમ્નાથે અસ્માના વાં શશ્વદ્ભિર્વવૃતીય વાજૈઃ ॥ ૭.૦૯૩.૦૬
સો અગ્ન એના નમસા સમિદ્ધોઽચ્છા મિત્રં વરુણમિન્દ્રં વોચેઃ ।
યત્સીમાગશ્ચકૃમા તત્સુ મૃળ તદર્યમાદિતિઃ શિશ્રથન્તુ ॥ ૭.૦૯૩.૦૭
એતા અગ્ન આશુષાણાસ ઇષ્ટીર્યુવોઃ સચાભ્યશ્યામ વાજાન્ ।
મેન્દ્રો નો વિષ્ણુર્મરુતઃ પરિ ખ્યન્યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૯૩.૦૮

ઇયં વામસ્ય મન્મન ઇન્દ્રાગ્ની પૂર્વ્યસ્તુતિઃ ।
અભ્રાદ્વૃષ્ટિરિવાજનિ ॥ ૭.૦૯૪.૦૧
શ‌ૃણુતં જરિતુર્હવમિન્દ્રાગ્ની વનતં ગિરઃ ।
ઈશાના પિપ્યતં ધિયઃ ॥ ૭.૦૯૪.૦૨
મા પાપત્વાય નો નરેન્દ્રાગ્ની માભિશસ્તયે ।
મા નો રીરધતં નિદે ॥ ૭.૦૯૪.૦૩
ઇન્દ્રે અગ્ના નમો બૃહત્સુવૃક્તિમેરયામહે ।
ધિયા ધેના અવસ્યવઃ ॥ ૭.૦૯૪.૦૪
તા હિ શશ્વન્ત ઈળત ઇત્થા વિપ્રાસ ઊતયે ।

સબાધો વાજસાતયે ॥ ૭.૦૯૪.૦૫
તા વાં ગીર્ભિર્વિપન્યવઃ પ્રયસ્વન્તો હવામહે ।
મેધસાતા સનિષ્યવઃ ॥ ૭.૦૯૪.૦૬
ઇન્દ્રાગ્ની અવસા ગતમસ્મભ્યં ચર્ષણીસહા ।
મા નો દુઃશંસ ઈશત ॥ ૭.૦૯૪.૦૭
મા કસ્ય નો અરરુષો ધૂર્તિઃ પ્રણઙ્મર્ત્યસ્ય ।
ઇન્દ્રાગ્ની શર્મ યચ્છતમ્ ॥ ૭.૦૯૪.૦૮
ગોમદ્ધિરણ્યવદ્વસુ યદ્વામશ્વાવદીમહે ।
ઇન્દ્રાગ્ની તદ્વનેમહિ ॥ ૭.૦૯૪.૦૯
યત્સોમ આ સુતે નર ઇન્દ્રાગ્ની અજોહવુઃ ।
સપ્તીવન્તા સપર્યવઃ ॥ ૭.૦૯૪.૧૦
ઉક્થેભિર્વૃત્રહન્તમા યા મન્દાના ચિદા ગિરા ।
આઙ્ગૂષૈરાવિવાસતઃ ॥ ૭.૦૯૪.૧૧
તાવિદ્દુઃશંસં મર્ત્યં દુર્વિદ્વાંસં રક્ષસ્વિનમ્ ।
આભોગં હન્મના હતમુદધિં હન્મના હતમ્ ॥ ૭.૦૯૪.૧૨
પ્ર ક્ષોદસા ધાયસા સસ્ર એષા સરસ્વતી ધરુણમાયસી પૂઃ ।
પ્રબાબધાના રથ્યેવ યાતિ વિશ્વા અપો મહિના સિન્ધુરન્યાઃ ॥ ૭.૦૯૫.૦૧
એકાચેતત્સરસ્વતી નદીનાં શુચિર્યતી ગિરિભ્ય આ સમુદ્રાત્ ।
રાયશ્ચેતન્તી ભુવનસ્ય ભૂરેર્ઘૃતં પયો દુદુહે નાહુષાય ॥ ૭.૦૯૫.૦૨
સ વાવૃધે નર્યો યોષણાસુ વૃષા શિશુર્વૃષભો યજ્ઞિયાસુ ।
સ વાજિનં મઘવદ્ભ્યો દધાતિ વિ સાતયે તન્વં મામૃજીત ॥ ૭.૦૯૫.૦૩
ઉત સ્યા નઃ સરસ્વતી જુષાણોપ શ્રવત્સુભગા યજ્ઞે અસ્મિન્ ।
મિતજ્ઞુભિર્નમસ્યૈરિયાના રાયા યુજા ચિદુત્તરા સખિભ્યઃ ॥ ૭.૦૯૫.૦૪
ઇમા જુહ્વાના યુષ્મદા નમોભિઃ પ્રતિ સ્તોમં સરસ્વતિ જુષસ્વ ।
તવ શર્મન્પ્રિયતમે દધાના ઉપ સ્થેયામ શરણં ન વૃક્ષમ્ ॥ ૭.૦૯૫.૦૫
અયમુ તે સરસ્વતિ વસિષ્ઠો દ્વારાવૃતસ્ય સુભગે વ્યાવઃ ।
વર્ધ શુભ્રે સ્તુવતે રાસિ વાજાન્યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૯૫.૦૬

બૃહદુ ગાયિષે વચોઽસુર્યા નદીનામ્ ।

સરસ્વતીમિન્મહયા સુવૃક્તિભિઃ સ્તોમૈર્વસિષ્ઠ રોદસી ॥ ૭.૦૯૬.૦૧

ઉભે યત્તે મહિના શુભ્રે અન્ધસી અધિક્ષિયન્તિ પૂરવઃ ।

સા નો બોધ્યવિત્રી મરુત્સખા ચોદ રાધો મઘોનામ્ ॥ ૭.૦૯૬.૦૨

ભદ્રમિદ્ભદ્રા કૃણવત્સરસ્વત્યકવારી ચેતતિ વાજિનીવતી ।

ગૃણાના જમદગ્નિવત્સ્તુવાના ચ વસિષ્ઠવત્ ॥ ૭.૦૯૬.૦૩

જનીયન્તો ન્વગ્રવઃ પુત્રીયન્તઃ સુદાનવઃ ।

સરસ્વન્તં હવામહે ॥ ૭.૦૯૬.૦૪

યે તે સરસ્વ ઊર્મયો મધુમન્તો ઘૃતશ્ચુતઃ ।

તેભિર્નોઽવિતા ભવ ॥ ૭.૦૯૬.૦૫

પીપિવાંસં સરસ્વતઃ સ્તનં યો વિશ્વદર્શતઃ ।

ભક્ષીમહિ પ્રજામિષમ્ ॥ ૭.૦૯૬.૦૬

યજ્ઞે દિવો નૃષદને પૃથિવ્યા નરો યત્ર દેવયવો મદન્તિ ।

ઇન્દ્રાય યત્ર સવનાનિ સુન્વે ગમન્મદાય પ્રથમં વયશ્ચ ॥ ૭.૦૯૭.૦૧

આ દૈવ્યા વૃણીમહેઽવાંસિ બૃહસ્પતિર્નો મહ આ સખાયઃ ।

યથા ભવેમ મીળ્હુષે અનાગા યો નો દાતા પરાવતઃ પિતેવ ॥ ૭.૦૯૭.૦૨

તમુ જ્યેષ્ઠં નમસા હવિર્ભિઃ સુશેવં બ્રહ્મણસ્પતિં ગૃણીષે ।

ઇન્દ્રં શ્લોકો મહિ દૈવ્યઃ સિષક્તુ યો બ્રહ્મણો દેવકૃતસ્ય રાજા ॥ ૭.૦૯૭.૦૩

સ આ નો યોનિં સદતુ પ્રેષ્ઠો બૃહસ્પતિર્વિશ્વવારો યો અસ્તિ ।

કામો રાયઃ સુવીર્યસ્ય તં દાત્પર્ષન્નો અતિ સશ્ચતો અરિષ્ટાન્ ॥ ૭.૦૯૭.૦૪

તમા નો અર્કમમૃતાય જુષ્ટમિમે ધાસુરમૃતાસઃ પુરાજાઃ ।

શુચિક્રન્દં યજતં પસ્ત્યાનાં બૃહસ્પતિમનર્વાણં હુવેમ ॥ ૭.૦૯૭.૦૫

તં શગ્માસો અરુષાસો અશ્વા બૃહસ્પતિં સહવાહો વહન્તિ ।

સહશ્ચિદ્યસ્ય નીલવત્સધસ્થં નભો ન રૂપમરુષં વસાનાઃ ॥ ૭.૦૯૭.૦૬

સ હિ શુચિઃ શતપત્રઃ સ શુન્ધ્યુર્હિરણ્યવાશીરિષિરઃ સ્વર્ષાઃ ।

બૃહસ્પતિઃ સ સ્વાવેશ ઋષ્વઃ પુરૂ સખિભ્ય આસુતિં કરિષ્ઠઃ ॥ ૭.૦૯૭.૦૭

દેવી દેવસ્ય રોદસી જનિત્રી બૃહસ્પતિં વાવૃધતુર્મહિત્વા ।

દક્ષાય્યાય દક્ષતા સખાયઃ કરદ્બ્રહ્મણે સુતરા સુગાધા ॥ ૭.૦૯૭.૦૮
ઇયં વાં બ્રહ્મણસ્પતે સુવૃક્તિર્બ્રહ્મેન્દ્રાય વજ્રિણે અકારિ ।
અવિષ્ટં ધિયો જિગૃતં પુરંધીર્જજસ્તમર્યો વનુષામરાતીઃ ॥ ૭.૦૯૭.૦૯
બૃહસ્પતે યુવમિન્દ્રશ્ચ વસ્વો દિવ્યસ્યેશાથે ઉત પાર્થિવસ્ય ।
ધત્તં રયિં સ્તુવતે કીરયે ચિદ્યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૯૭.૧૦

અધ્વર્યવોઽરુણં દુગ્ધમંશું જુહોતન વૃષભાય ક્ષિતીનામ્ ।
ગૌરાદ્વેદીયાઁ અવપાનમિન્દ્રો વિશ્વાહેદ્યાતિ સુતસોમમિચ્છન્ ॥ ૭.૦૯૮.૦૧
યદ્દધિષે પ્રદિવિ ચાર્વન્નં દિવેદિવે પીતિમિદસ્ય વક્ષિ ।
ઉત હૃદોત મનસા જુષાણ ઉશન્નિન્દ્ર પ્રસ્થિતાન્પાહિ સોમાન્ ॥ ૭.૦૯૮.૦૨
જજ્ઞાનઃ સોમં સહસે પપાથ પ્ર તે માતા મહિમાનમુવાચ ।
એન્દ્ર પપ્રાથોર્વ૧ન્તરિક્ષં યુધા દેવેભ્યો વરિવશ્ચકર્થ ॥ ૭.૦૯૮.૦૩
યદ્યોધયા મહતો મન્યમાનાન્સાક્ષામ તાન્બાહુભિઃ શાશદાનાન્ ।
યદ્વા નૃભિર્વૃત ઇન્દ્રાભિયુધ્યાસ્તં ત્વયાજિં સૌશ્રવસં જયેમ ॥ ૭.૦૯૮.૦૪
પ્રેન્દ્રસ્ય વોચં પ્રથમા કૃતાનિ પ્ર નૂતના મઘવા યા ચકાર ।
યદેદદેવીરસહિષ્ટ માયા અથાભવત્કેવલઃ સોમો અસ્ય ॥ ૭.૦૯૮.૦૫
તવેદં વિશ્વમભિતઃ પશવ્યં૧ યત્પશ્યસિ ચક્ષસા સૂર્યસ્ય ।
ગવામસિ ગોપતિરેક ઇન્દ્ર ભક્ષીમહિ તે પ્રયતસ્ય વસ્વઃ ॥ ૭.૦૯૮.૦૬
બૃહસ્પતે યુવમિન્દ્રશ્ચ વસ્વો દિવ્યસ્યેશાથે ઉત પાર્થિવસ્ય ।
ધત્તં રયિં સ્તુવતે કીરયે ચિદ્યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૯૮.૦૭

પરો માત્રયા તન્વા વૃધાન ન તે મહિત્વમન્વશ્નુવન્તિ ।
ઉભે તે વિદ્મ રજસી પૃથિવ્યા વિષ્ણો દેવ ત્વં પરમસ્ય વિત્સે ॥ ૭.૦૯૯.૦૧
ન તે વિષ્ણો જાયમાનો ન જાતો દેવ મહિમ્નઃ પરમન્તમાપ ।
ઉદસ્તભ્ના નાકમૃષ્વં બૃહન્તં દાધર્થ પ્રાચીં કકુભં પૃથિવ્યાઃ ॥ ૭.૦૯૯.૦૨
ઇરાવતી ધેનુમતી હિ ભૂતં સૂયવસિની મનુષે દશસ્યા ।
વ્યસ્તભ્ના રોદસી વિષ્ણવેતે દાધર્થ પૃથિવીમભિતો મયૂખૈઃ ॥ ૭.૦૯૯.૦૩
ઉરું યજ્ઞાય ચક્રથુરુ લોકં જનયન્તા સૂર્યમુષાસમગ્નિમ્ ।
દાસસ્ય ચિદ્વૃષશિપ્રસ્ય માયા જઘ્નથુર્નરા પૃતનાજ્યેષુ ॥ ૭.૦૯૯.૦૪

ઇન્દ્રાવિષ્ણૂ દૃંહિતાઃ શમ્બરસ્ય નવ પુરો નવતિં ચ શ્નથિષ્ટમ્ ।
શતં વર્ચિનઃ સહસ્રં ચ સાકં હથો અપ્રત્યસુરસ્ય વીરાન્ ॥ ૭.૦૯૯.૦૫
ઇયં મનીષા બૃહતી બૃહન્તોરુક્રમા તવસા વર્ધયન્તી ।
રરે વાં સ્તોમં વિદથેષુ વિષ્ણો પિન્વતમિષો વૃજનેષ્વિન્દ્ર ॥ ૭.૦૯૯.૦૬
વષટ્ તે વિષ્ણવાસ આ કૃણોમિ તન્મે જુષસ્વ શિપિવિષ્ટ હવ્યમ્ ।
વર્ધન્તુ ત્વા સુષ્ટુતયો ગિરો મે યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૯૯.૦૭

નૂ મર્તો દયતે સનિષ્યન્યો વિષ્ણવ ઉરુગાયાય દાશત્ ।
પ્ર યઃ સત્રાચા મનસા યજાત એતાવન્તં નર્યમાવિવાસાત્ ॥ ૭.૧૦૦.૦૧
ત્વં વિષ્ણો સુમતિં વિશ્વજન્યામપ્રયુતામેવયાવો મતિં દાઃ ।
પર્ચો યથા નઃ સુવિતસ્ય ભૂરેરશ્વાવતઃ પુરુશ્ચન્દ્રસ્ય રાયઃ ॥ ૭.૧૦૦.૦૨
ત્રિર્દેવઃ પૃથિવીમેષ એતાં વિ ચક્રમે શતર્ચસં મહિત્વા ।
પ્ર વિષ્ણુરસ્તુ તવસસ્તવીયાન્ત્વેષં હ્યસ્ય સ્થવિરસ્ય નામ ॥ ૭.૧૦૦.૦૩
વિ ચક્રમે પૃથિવીમેષ એતાં ક્ષેત્રાય વિષ્ણુર્મનુષે દશસ્યન્ ।
ધ્રુવાસો અસ્ય કીરયો જનાસ ઉરુક્ષિતિં સુજનિમા ચકાર ॥ ૭.૧૦૦.૦૪
પ્ર તત્તે અદ્ય શિપિવિષ્ટ નામાર્યઃ શંસામિ વયુનાનિ વિદ્વાન્ ।
તં ત્વા ગૃણામિ તવસમતવ્યાન્ક્ષયન્તમસ્ય રજસઃ પરાકે ॥ ૭.૧૦૦.૦૫
કિમિત્તે વિષ્ણો પરિચક્ષ્યં ભૂત્પ્ર યદ્વવક્ષે શિપિવિષ્ટો અસ્મિ ।
મા વર્પો અસ્મદપ ગૂહ એતદ્યદન્યરૂપઃ સમિથે બભૂથ ॥ ૭.૧૦૦.૦૬
વષટ્ તે વિષ્ણવાસ આ કૃણોમિ તન્મે જુષસ્વ શિપિવિષ્ટ હવ્યમ્ ।
વર્ધન્તુ ત્વા સુષ્ટુતયો ગિરો મે યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૧૦૦.૦૭

તિસ્રો વાચઃ પ્ર વદ જ્યોતિરગ્રા યા એતદ્દુહ્રે મધુદોઘમૂધઃ ।
સ વત્સં કૃણ્વન્ગર્ભમોષધીનાં સદ્યો જાતો વૃષભો રોરવીતિ ॥ ૭.૧૦૧.૦૧
યો વર્ધન ઓષધીનાં યો અપાં યો વિશ્વસ્ય જગતો દેવ ઈશે ।
સ ત્રિધાતુ શરણં શર્મ યંસત્ત્રિવર્તુ જ્યોતિઃ સ્વભિષ્ટ્ય૧સ્મે ॥ ૭.૧૦૧.૦૨
સ્તરીરુ ત્વદ્ભવતિ સૂત ઉ ત્વદ્યથાવશં તન્વં ચક્ર એષઃ ।
પિતુઃ પયઃ પ્રતિ ગૃભ્ણાતિ માતા તેન પિતા વર્ધતે તેન પુત્રઃ ॥ ૭.૧૦૧.૦૩
યસ્મિન્વિશ્વાનિ ભુવનાનિ તસ્થુસ્તિસ્રો દ્યાવસ્ત્રેધા સસ્રુરાપઃ ।

ત્રયઃ કોશાસ ઉપસેચનાસો મધ્વઃ શ્ચોતન્ત્યભિતો વિરપ્શમ્ ॥ ૭.૧૦૧.૦૪
ઇદં વચઃ પર્જન્યાય સ્વરાજે હૃદો અસ્ત્વન્તરં તજ્જુજોષત્ ।
મયોભુવો વૃષ્ટયઃ સન્ત્વસ્મે સુપિપ્પલા ઓષધીર્દેવગોપાઃ ॥ ૭.૧૦૧.૦૫
સ રેતોધા વૃષભઃ શશ્વતીનાં તસ્મિન્નાત્મા જગતસ્તસ્થુષશ્ચ ।
તન્મ ઋતં પાતુ શતશારદાય યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૧૦૧.૦૬

પર્જન્યાય પ્ર ગાયત દિવસ્પુત્રાય મીળ્હુષે ।
સ નો યવસમિચ્છતુ ॥ ૭.૧૦૨.૦૧
યો ગર્ભમોષધીનાં ગવાં કૃણોત્યર્વતામ્ ।
પર્જન્યઃ પુરુષીણામ્ ॥ ૭.૧૦૨.૦૨
તસ્મા ઇદાસ્યે હવિર્જુહોતા મધુમત્તમમ્ ।
ઇળાં નઃ સંયતં કરત્ ॥ ૭.૧૦૨.૦૩

સંવત્સરં શશયાના બ્રાહ્મણા વ્રતચારિણઃ ।
વાચં પર્જન્યજિન્વિતાં પ્ર મણ્ડૂકા અવાદિષુઃ ॥ ૭.૧૦૩.૦૧
દિવ્યા આપો અભિ યદેનમાયન્દૃતિં ન શુષ્કં સરસી શયાનમ્ ।
ગવામહ ન માયુર્વત્સિનીનાં મણ્ડૂકાનાં વગ્નુરત્રા સમેતિ ॥ ૭.૧૦૩.૦૨
યદીમેનાઁ ઉશતો અભ્યવર્ષીત્તૃષ્યાવતઃ પ્રાવૃષ્યાગતાયામ્ ।
અખ્ખલીકૃત્યા પિતરં ન પુત્રો અન્યો અન્યમુપ વદન્તમેતિ ॥ ૭.૧૦૩.૦૩
અન્યો અન્યમનુ ગૃભ્ણાત્યેનોરપાં પ્રસર્ગે યદમન્દિષાતામ્ ।
મણ્ડૂકો યદભિવૃષ્ટઃ કનિષ્કન્પૃશ્નિઃ સમ્પૃઙ્ક્તે હરિતેન વાચમ્ ॥ ૭.૧૦૩.૦૪
યદેષામન્યો અન્યસ્ય વાચં શાક્તસ્યેવ વદતિ શિક્ષમાણઃ ।
સર્વં તદેષાં સમૃધેવ પર્વ યત્સુવાચો વદથનાધ્યપ્સુ ॥ ૭.૧૦૩.૦૫
ગોમાયુરેકો અજમાયુરેકઃ પૃશ્નિરેકો હરિત એક એષામ્ ।
સમાનં નામ બિભ્રતો વિરૂપાઃ પુરુત્રા વાચં પિપિશુર્વદન્તઃ ॥ ૭.૧૦૩.૦૬
બ્રાહ્મણાસો અતિરાત્રે ન સોમે સરો ન પૂર્ણમભિતો વદન્તઃ ।
સંવત્સરસ્ય તદહઃ પરિ ષ્ઠ યન્મણ્ડૂકાઃ પ્રાવૃષીણં બભૂવ ॥ ૭.૧૦૩.૦૭
બ્રાહ્મણાસઃ સોમિનો વાચમક્રત બ્રહ્મ કૃણ્વન્તઃ પરિવત્સરીણમ્ ।
અધ્વર્યવો ઘર્મિણઃ સિષ્વિદાના આવિર્ભવન્તિ ગુહ્યા ન કે ચિત્ ॥ ૭.૧૦૩.૦૮

દેવહિતિં જુગુપુર્દ્વાદશસ્ય ઋતું નરો ન પ્ર મિનન્ત્યેતે ।
સંવત્સરે પ્રાવૃષ્યાગતાયાં તપ્તા ઘર્મા અશ્નુવતે વિસર્ગમ્ ॥ ૭.૧૦૩.૦૯
ગોમાયુરદાદજમાયુરદાત્પૃશ્નિરદાદ્ધરિતો નો વસૂનિ ।
ગવાં મણ્ડૂકા દદતઃ શતાનિ સહસ્રસાવે પ્ર તિરન્ત આયુઃ ॥ ૭.૧૦૩.૧૦
ઇન્દ્રાસોમા તપતં રક્ષ ઉબ્જતં ન્યર્પયતં વૃષણા તમોવૃધઃ ।
પરા શ઼ૃણીતમચિતો ન્યોષતં હતં નુદેથાં નિ શિશીતમત્રિણઃ ॥ ૭.૧૦૪.૦૧
ઇન્દ્રાસોમા સમઘશંસમભ્ય૧ઘં તપુર્યયસ્તુ ચરુરગ્નિવાઁ ઇવ ।
બ્રહ્મદ્વિષે ક્રવ્યાદે ઘોરચક્ષસે દ્વેષો ધત્તમનવાયં કિમીદિને ॥ ૭.૧૦૪.૦૨
ઇન્દ્રાસોમા દુષ્કૃતો વવ્રે અન્તરનારમ્ભણે તમસિ પ્ર વિધ્યતમ્ ।
યથા નાતઃ પુનરેકશ્ચનોદયત્તદ્વામસ્તુ સહસે મન્યુમચ્છવઃ ॥ ૭.૧૦૪.૦૩
ઇન્દ્રાસોમા વર્તયતં દિવો વધં સં પૃથિવ્યા અઘશંસાય તર્હણમ્ ।
ઉત્તક્ષતં સ્વર્યં૧ પર્વતેભ્યો યેન રક્ષો વાવૃધાનં નિજૂર્વથઃ ॥ ૭.૧૦૪.૦૪
ઇન્દ્રાસોમા વર્તયતં દિવસ્પર્યગ્નિતપ્તેભિર્યુવમશ્મહન્મભિઃ ।
તપુર્વધેભિરજરેભિરત્રિણો નિ પર્શાને વિધ્યતં યન્તુ નિસ્વરમ્ ॥ ૭.૧૦૪.૦૫
ઇન્દ્રાસોમા પરિ વાં ભૂતુ વિશ્વત ઇયં મતિઃ કક્ષ્યાશ્વેવ વાજિના ।
યાં વાં હોત્રાં પરિહિનોમિ મેધયેમા બ્રહ્માણિ નૃપતીવ જિન્વતમ્ ॥ ૭.૧૦૪.૦૬
પ્રતિ સ્મરેથાં તુજયદ્ભિરેવૈર્હતં દ્રુહો રક્ષસો ભઙ્ગુરાવતઃ ।
ઇન્દ્રાસોમા દુષ્કૃતે મા સુગં ભૂદ્યો નઃ કદા ચિદભિદાસતિ દ્રુહા ॥ ૭.૧૦૪.૦૭
યો મા પાકેન મનસા ચરન્તમભિચષ્ટે અનૃતેભિર્વચોભિઃ ।
આપ ઇવ કાશિના સંગૃભીતા અસન્નસ્ત્વાસત ઇન્દ્ર વક્તા ॥ ૭.૧૦૪.૦૮
યે પાકશંસં વિહરન્ત એવૈર્યે વા ભદ્રં દૂષયન્તિ સ્વધાભિઃ ।
અહયે વા તાન્પ્રદદાતુ સોમ આ વા દધાતુ નિરૃતેરુપસ્થે ॥ ૭.૧૦૪.૦૯
યો નો રસં દિપ્સતિ પિત્વો અગ્ને યો અશ્વાનાં યો ગવાં યસ્તનૂનામ્ ।
રિપુઃ સ્તેનઃ સ્તેયકૃદ્દભ્રમેતુ નિ ષ હીયતાં તન્વા૩ તના ચ ॥ ૭.૧૦૪.૧૦
પરઃ સો અસ્તુ તન્વા૩ તના ચ તિસ્રઃ પૃથિવીરધો અસ્તુ વિશ્વાઃ ।
પ્રતિ શુષ્યતુ યશો અસ્ય દેવા યો નો દિવા દિપ્સતિ યશ્ચ નક્તમ્ ॥ ૭.૧૦૪.૧૧
સુવિજ્ઞાનં ચિકિતુષે જનાય સચ્ચાસચ્ચ વચસી પસ્પૃધાતે ।

તયોર્યત્સત્યં યતરદૃજીયસ્તદિત્સોમોઽવતિ હન્ત્યાસત્ ॥ ૭.૧૦૪.૧૨

ન વા ઉ સોમો વૃજિનં હિનોતિ ન ક્ષત્રિયં મિથુયા ધારયન્તમ્ ।

હન્તિ રક્ષો હન્ત્યાસદ્વદન્તમુભાવિન્દ્રસ્ય પ્રસિતૌ શયાતે ॥ ૭.૧૦૪.૧૩

યદિ વાહમનૃતદેવ આસ મોઘં વા દેવાઁ અપ્યૂહે અગ્ને ।

કિમસ્મભ્યં જાતવેદો હૃણીષે દ્રોઘવાચસ્તે નિરૃથં સચન્તામ્ ॥ ૭.૧૦૪.૧૪

અદ્યા મુરીય યદિ યાતુધાનો અસ્મિ યદિ વાયુસ્તતપ પૂરુષસ્ય ।

અધા સ વીરૈર્દશભિર્વિ યૂયા યો મા મોઘં યાતુધાનેત્યાહ ॥ ૭.૧૦૪.૧૫

યો માયાતું યાતુધાનેત્યાહ યો વા રક્ષાઃ શુચિરસ્મીત્યાહ ।

ઇન્દ્રસ્તં હન્તુ મહતા વધેન વિશ્વસ્ય જન્તોરધમસ્પદીષ્ટ ॥ ૭.૧૦૪.૧૬

પ્ર યા જિગાતિ ખર્ગલેવ નક્તમપ દ્રુહા તન્વં૧ ગૂહમાના ।

વવ્રાઁ અનન્તાઁ અવ સા પદીષ્ટ ગ્રાવાણો ઘ્નન્તુ રક્ષસ ઉપબ્દૈઃ ॥ ૭.૧૦૪.૧૭

વિ તિષ્ઠધ્વં મરુતો વિક્ષ્વિ૧ચ્છત ગૃભાયત રક્ષસઃ સં પિનષ્ટન ।

વયો યે ભૂત્વી પતયન્તિ નક્તભિર્યે વા રિપો દધિરે દેવે અધ્વરે ॥ ૭.૧૦૪.૧૮

પ્ર વર્તય દિવો અશ્માનમિન્દ્ર સોમશિતં મઘવન્સં શિશાધિ ।

પ્રાક્તાદપાક્તાદધરાદુદક્તાદભિ જહિ રક્ષસઃ પર્વતેન ॥ ૭.૧૦૪.૧૯

એત ઉ ત્યે પતયન્તિ શ્વયાતવ ઇન્દ્રં દિપ્સન્તિ દિપ્સવોઽદાભ્યમ્ ।

શિશીતે શક્રઃ પિશુનેભ્યો વધં નૂનં સૃજદશનિં યાતુમદ્ભ્યઃ ॥ ૭.૧૦૪.૨૦

ઇન્દ્રો યાતૂનામભવત્પરાશરો હવિર્મથીનામભ્યા૩વિવાસતામ્ ।

અભીદુ શક્રઃ પરશુર્યથા વનં પાત્રેવ ભિન્દન્સત એતિ રક્ષસઃ ॥ ૭.૧૦૪.૨૧

ઉલૂકયાતું શુશુલૂકયાતું જહિ શ્વયાતુમુત કોકયાતુમ્ ।

સુપર્ણયાતુમુત ગૃધ્રયાતું દૃષદેવ પ્ર મૃણ રક્ષ ઇન્દ્ર ॥ ૭.૧૦૪.૨૨

મા નો રક્ષો અભિ નડ્યાતુમાવતામપોચ્છતુ મિથુના યા કિમીદિના ।

પૃથિવી નઃ પાર્થિવાત્પાત્વંહસોઽન્તરિક્ષં દિવ્યાત્પાત્વસ્માન્ ॥ ૭.૧૦૪.૨૩

ઇન્દ્ર જહિ પુમાંસં યાતુધાનમુત સ્ત્રિયં માયયા શાશદાનામ્ ।

વિગ્રીવાસો મૂરદેવા ઋદન્તુ મા તે દૃશન્સૂર્યમુચ્ચરન્તમ્ ॥ ૭.૧૦૪.૨૪

પ્રતિ ચક્ષ્વ વિ ચક્ષ્વેન્દ્રશ્ચ સોમ જાગૃતમ્ ।

રક્ષોભ્યો વધમસ્યતમશનિં યાતુમદ્ભ્યઃ ॥ ૭.૧૦૪.૨૫

Last updated July 2, 2013

Special mention : Initial processing and help by Avinash and Shashi Sathaye,
Avinash Chopde, Shree Devi Kumar, Sunder Hattangadi, John Gardner.
Reprocessed from Original in final form by Detlef Eichler with additional corrections.
See Detlef's site http://www.detlef108.de/Rigvedatm
for other details and formats.

The text is shown with accents (Anudattas, dependent Svaritas,
and independent Svaritas including Kampas). Words are connected (agnimILe).
Ch is doubled as in gachChati according to the rules of Rigveda-Pratishakhya.
At the end of a word m is replaced by Anusvara M if the initial letter of the
following word is a labial stop consonant (p, ph, b, bh, m).
Visarga H before sh, Sh or s followed by a voiceless consonant has been restored.

Source : The Aufrecht/van Nooten/Holland (Samhita) version
of the Rigveda (http://www.people.fasarvard.edu/ witzel/onlineRVtm).
In this text accented vowels have Udatta or 'independent Svarita' markers.
Kampas are not shown. Words are separated (agnim ILe).
Ch is not doubled as in gaChati. At the end of a word we find m before
a following labial stop consonant (p, ph, b, bh, m).
Visarga H before sh, Sh or s followed by a voiceless consonant has
been dropped according to a rule of Rigveda-Pratishakhya.

Send corrections to : detlefeichler@googlemail.com, sanskrit@cheerful.com

*Rigveda Mandala 7*

pdf was typeset on October 2, 2020

Please send corrections to *sanskrit@cheerful.com*